This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-2700 E

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
अनुभवामृत परिभाषा	ज्ञानेश्वर	धर्मशास्त्र	पूर्ण	—	3/9	32	मराठी	कागद	07	25		

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-2700

०॥ अथ पंचरत्नप्रकाशिका प्रारंभः ॥०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

०॥श्रीगणेशायनमः॥ ॥श्रीमन्नित्यानंदायनमः॥ ॥नमःशुद्धायशांता
॥१॥ यनित्यानंदस्वरूपिणे॥संसारानलसंत्राणगुरूणांगुरवेनमः॥१॥नमस्ते
स्तुयतींद्रायशंकरायमहात्मने॥संसारोदधिमग्नानांततःसंत्राणहेतवे
॥२॥यत्पादपंकजरजोपहृतांतरात्मायन्नामवाक्परिणतोजितकामश
मि त्रुः॥तीर्त्वामहोदधिमिमंमृतिजन्मसंघंयस्मिंस्थितस्तमनवंप्रणमामिवि
ष्णुं॥३॥यद्ध्यानामृतसंप्लुतेनमनसातीर्त्वाभवांभोनिधिंयत्पादांबुजभृंगसे
गनिरतैःप्राप्यंचयत्प्राप्यते॥सारासारविचारकुशलैस्त्यक्तान्यवार्त्तैःसदा पा.र
भीमातीरनिवासिनंकुलगुरुंश्रीविठ्ठलंचिंतये॥४॥एवंगुरुदैवतमभिवंद्य ॥१
कलिकलुषपीडितांतरानधीतवेदवेदांगदोषप्रतिबंधनवेदांतानभिगमा
नोकेनचित्भाग्योदयेनेहमृतिजनिसंप्लवेसुखानासेदुःखानुभवद्वारा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततो मुमुक्षूणां येन प्रवेशः स्यात्तदुपायभूतानि पंचरत्नानि सकलवेदार्थसा
रभूतानि श्रीभगवदाचार्यैः पुरा प्रणीतानि संति तेषां विवरणं मया शुभसंस्का
रकांक्षिणा ऽत्यंताव्युत्पन्नेनापि केवलया भक्त्या प्रेरितेन श्रीमन्नित्यानंदानु
चरेण क्रियते तत्र तावदिह मोक्षशास्त्रेऽधिकारिविषयसंबंधप्रयोजनान्य
पेक्षते तानि तु स्वतोऽपरोक्षाखंडाद्वितीयाचात्माऽशेषपुमर्थो निरस्ताशेषान
र्थो ब्रह्मस्वरूपः सन्ननाद्यया सानासयाऽस्वाश्रयया स्वविषयया ऽनिर्वच
नीयया ऽविद्यया स्वप्नावस्थायामिव स्वात्मानं तद्विपरीतं सखंडं सद्विती
यमप्राप्ताशेषपुमर्थं प्राप्ताशेषानर्थं मन्यमानः शुभाशुभकर्मफलं भुंजा
नः सुरनरतिर्यगादिषु योनिषु परिवर्त्तमान इष्टप्राप्तिमनिष्टापहतिं चाकां
क्षमाणो लौकिकवैदिकोपायैश्च यतमानोऽप्यभिलषितमलभमानः ॥ केन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चिदिह जन्मनि जन्मांतरे वा सुकृतपुण्यलेशेन काम्यनिषिद्धवर्जनपुरःसरवेद
विहितेश्वरार्थानुष्ठानेनापगतरागादिमलो नित्यादिदर्शनेनेहामुत्रार्थभोगवि
रागः शमादिसाधनोपेतवेदांतबुभुत्सया त्यक्तैषणः कृतसर्वसंन्यासो गुरूप
सदनद्वारा श्रुततत्त्वमस्यादिवाक्यो वेदांतश्रवणादिनाहं ब्रह्मास्मीति ब्रह्मा
त्मभावं प्रतिपन्नो निवृत्ताज्ञानतत्कार्यो विमुच्यत इति वेदांतसिद्धांते संपद्यंते
तान्येवाभिधानत इह विवक्षितानि संति तत्र तत्र दर्शयिष्यामस्तत्राधिकारिनि
र्णयार्थं द्विरत्ने निर्मिते तत्रापि प्रथमं रत्नमधिकारसिद्ध्यर्थं प्रणीतमस्ति तदे
वादौ व्याख्यायते तत्रेदं चिंत्यते इहाविद्यानिगडे निबद्धाः सर्वेपि जंतवश्चाक्रं
दमानाः संतः सर्वेपि मुमुक्षवः स्युः न तु न दृश्यते तेषां च ये तामसयोनिं प्रा
प्तास्तमोपहतज्ञानाः पश्वादयः केवलं दुःखं भुंजानास्तेपि सुखित्वाऽसेन भा २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिष्ठंतिनतेमुमुक्षवोभवितुमर्हंतिऽथमनुष्याः सत्वसंयुक्तास्तेषामपिशूद्रादि
यः रजस्तमोमिश्रास्तमः प्रधानावेदबहिष्कृतत्वात् नतेमोक्षाधिकारिणः सं
ति अतोब्रह्मक्षत्रवैश्यवर्णिनोद्विजन्मानोवेदाधिकृतास्तान् ब्राह्मणमुख्या
नुदिश्येहाचार्योयत्वेदनविहितंतत्क्रियतामित्युपदिशति नतुमुमुक्षुत्व
स्यतुल्यत्वे कुतोब्राह्मणएवमुख्यइतिचेत् ब्राह्मणस्यजीवनवृत्तेरल्पायास
साध्यत्वात् सत्वप्राधान्याच्चभिक्षामात्रेणक्षेमत्वस्यदर्शनात् सर्वकर्मसं
न्यासाधिकृतत्वाच्च नचक्षत्रियवैश्यौमोक्षानधिकारिणावितिवाच्यंतयोर्ब्रा
ह्मणोपसदनात् सर्वसंपद्यतेलक्षणातोवनप्रवेशादिलक्षणः संन्यासोप्यु
पपद्यते नन्विहशूद्रादयोवेदेऽनधिकृतत्वात् नमोक्षाधिकारिणश्चेत्तेषांम
ध्येकस्यचिदिहसंसारेदोषदर्शनेनजातोचेत् मुमुक्षा तर्हिसकिमुपेक्ष्यइ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्वरेणतस्त्रियेणवेतिचेन्न॥पौराणवाक्येनोपदेश्यत्वात्तस्यतथाचयद्इदंशृणु
यान्नित्यंयश्चापिपरिकीर्तयेत्॥नाशुभंप्राप्नुयात्किंचित्सोमुत्रेहचमानवः॥
वेदांतगोब्राह्मणःस्यात्क्षत्रियोविजयीभवेत्॥वैश्योधनसमृद्धःस्याच्छूद्रः
सुखमवाप्नुयात्॥अत्रश्रवणविषयःशूद्रइतिव्याख्यातत्वात्॥शूद्रस्यश्रव
णेधिकारः॥गीतासुचस्त्रियोवैश्यास्तथाशूद्रास्तेपियांतिपरांगतिमित्यनेन
परमगतेःश्रवणात्॥अत्रापिशूद्रादीनांश्रवणएवाधिकारोविज्ञेयःअन्य
त्रापिश्रावयेच्चतुरोवर्णाइतितस्माद्भगवन्नामस्मरणात्तद्गुणानुश्रवणा
च्चसंजातात्सर्वपापक्षयःशूद्रोपिपुराणादिनोपदेश्यएवसोपिनिवृत्तप्रति
सिँद्धप्रचारःसन्ब्राह्मणसेवापरायणोविगलरागादिमलोस्तिचेत्तस्याप्य
तीतजन्मनिब्राह्मणादित्वमभ्युपेयंकेनचित्कर्मदोषेणशूद्रवर्णमात्रंप्राप्तो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विदुरादिवदितिनोचेच्छास्त्रानर्थ्यंस्यात् तस्मादिह द्विजन्मान एव मुख्याधि
कारिणस्तेपिब्राह्मणमुख्यास्तानुदिश्योपदिशत्याचार्यस्तत्रेदंप्रथमंरत्नमधि
कारसिद्धिसाधकं॥ ॥वेदोनित्यमधीयतांतदुदितंकर्मस्वनुष्ठीयतांतेनेश
स्यविधीयतामपचितिःकाम्येमतिस्त्यज्यतां॥पापौघःपरिधूयतांभव
सुखेदोषोनुसंधीयतामात्मेच्छाव्यवसीयतांनिजगृहात्तूर्णंविनिर्गम्य
तां॥१॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥
अत्रवेदोनित्यमधीयतामित्यनेनकृतोपनयनब्रह्मचारिविषयउक्तोब्र
ह्मचारिणोवेदाध्ययनेनपुण्यातिशयाधानेनवेदार्थसंस्काराधानेनचभा
विपापकेषुकर्मस्वप्रवृत्त्यावेदविहितानुष्ठानेनेश्वराराधनेनसत्वशुद्धिमनु
लक्ष्य॥यद्वाएतेनैवपुण्यातिशयेनजन्मांतरपुण्यसहायकेनब्रह्मचर्यदशा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यामेवोत्पन्नेन नित्यानित्यविवेकेन संज्ञातः सर्वेष्विहामुत्रभोगेषु विरागश्चे
च्छमादियत्तत्प्राप्तसर्वकर्मसंन्यासेन गुरूपसदनद्वाराश्च तत्त्वमस्यादि
वाक्यो वेदांतश्रवणादिना कृतपदपदार्थविवेकोऽसकृदभ्यासात्कृतकृ
त्यो भवत्विति यदहरेव विरजेत्तदहरेव प्रव्रजेदित्यादिश्रुतेः तस्मात्सर्वैः श्रेयो
र्थिभिर्द्विजातिभिः ब्राह्मणमुख्यैर्नित्यमनन्यतया प्राप्तमध्येतव्यमिति वि
धिः किंचायं वेदाध्ययनविधिः साधारणतया सर्वेषां द्विजातीनां धर्मः सर्वै
र्द्विजातिभिरध्येतव्यमिति यथाकामं फलं भविष्यति॥ यदि ब्रह्मचर्यदशाया
मेव संजातवैराग्यो मोक्षार्थी तर्हि तदैव स्वाश्रमे संस्थितः प्रव्राजी वोक्तप्र
कारेण कृतकृत्यो भवतु॥ विषयरागी चेदुद्वाहितो विहितकर्मानुष्ठानेन धर्मा
र्थकामप्राप्तस्वाश्रमादाश्रमं गच्छेत्यादिविधिनाक्रमतो मुमुक्षुर्भूत्वोक्तसा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धनेन कृतकृत्यो भवत्विति संचिंत्य वेदाध्ययनं विहितमिति विज्ञेयं तथा च स्मृ
तिः यज्ञानां तपसां चैव शुभानां चैव कर्मणां वेद एव द्विजातीनां निःश्रेयसकरः
पर इति तस्मात्सर्वैरपि श्रेयोर्थिभिर्नित्यं सततं यावदध्ययनसमाप्तिर्वेदोधीय
तामिति सर्वान् द्विजातीन् प्रति विधिरथाध्ययनानंतरं कृत्यमुपदिशति तदुदि
तमिति कृतवेदाध्ययनः पुमान् श्रेयोर्थ्यापाततो वेदार्थवित्तेन तदुदितं वेदोक्तं
कर्मस्ववर्णाश्रमविहितं स्वनुष्ठीयतां सुतरां यथाविहितमास्तिक्यबुध्यानुष्ठा
नं क्रियतां न केवलं विहितकर्मज्ञानमात्रेणः नास्तिक्यबुध्या केनचिदौत्सुक्ये
नानुष्ठानेन वा फलं भवतीति भावः॥ ननु कर्मणा पितृलोक इत्यादिभिर्लोकसा
धकं कर्म नानिःश्रेयसार्थिभिरनुष्ठेयं स्यात् मोक्षस्य कर्माजन्यत्वस्य श्रवणात्
नास्त्यकृतः कृतेनेति श्रुतेः कर्मणश्चाविद्यकत्वादिति चेत्सत्यं तथाप्यविद्यावत्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यागावधित्वेनेश्वरार्थानुष्ठानेन सत्वशुद्धिप्रदानेन मोक्षसाधनब्रह्मात्मज्ञा
नस्य द्वारभूतं सद्भवतीति मोक्षायेत्याह तेनेशस्येति तेन वेदोदितेन कर्मणेशस्य स
र्वांतर्यामित्वेन जगन्नियंतुरचिंत्यशक्तेः कर्मप्रवर्त्तकस्य विधीयतां क्रियतामप
चितिः पूजा फलाभिसंधिकर्तृत्वाभिमानराहित्येनेश्वरे तत्समर्पणमित्यर्थः ॥
नास्त्यकृतः कृतेनेति श्रुतेस्तात्पर्यं तु ब्रह्मणः प्रत्यक्स्वरूपत्वात्सर्वप्रमाणावि
षयत्वादविद्ययाकृतव्यवधानत्वाद्गुरुशास्त्रतस्तत्साक्षिवेद्यतयोत्पन्नयावि
द्ययाऽविद्यानिवृत्तिरेव मोक्षो न त्वकृतो मोक्षः कृतेन कर्मणेति ॥ ब्रह्मणो मोक्ष
स्वरूपत्वात्स्वतःसिद्धत्वाच्च सर्वप्रत्ययप्रकाशकत्वात्स्वैकाशस्वरूपत्वाच्च ॥
तस्मादनेकजन्मकृतपापकर्मफलं भूतो विद्याप्रतीयः प्रतिबंधस्तन्निवृत्त्य
र्थं यथोक्तेन कर्मणेश्वरपूजनं क्रियतामिति युक्तमेवोक्तं ॥ किंच कर्मणो बहिःप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लसाधकत्वान्मोक्षासाधनत्वेपीश्वराराधनार्थत्वेन क्रियमाणस्य मोक्षबहिरं
गत्वोपपत्त्या कर्मानुष्ठानकालेपि कर्मसंन्यासएवाभ्युपेयो गौणसंन्यासस्याभिप्रे
तत्वात्॥ भगवतापि अनाश्रितः कर्मफलं कार्यं कर्म करोति यः॥ स संन्यासीत्या
दिना॥ ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः॥ लिप्यते न स पापेन पद्म
पत्रमिवांभसेत्यादिना च॥ तस्मादीश्वरार्थेन कर्मानुष्ठानेन मोक्षस्य कर्मसाध्य
त्वे स्यात्॥ ननु वेदविहितानुष्ठानप्राप्तौ काम्यमप्यनुष्ठेयं स्यात्तदनुष्ठाने च न
फलत्यागइष्टः फलोद्देशस्य तस्यांगत्वेन विधानादित्याशंक्याह काम्यइति॥
काम्यं तु पुत्रेष्ट्याद्यात्मकं वापीकूपारामोद्यानविधानात्मकं च तस्मिन् काम्य
छा कर्मणि मतिस्तदारंभके [illegible] त्यज्यतां तन्नादरणीयमित्यर्थः॥ न चाग्निहोत्रादी
नामपि लोकसाधनत्वश्रवणात् तान्यपि त्याज्यानीति वाच्यं तत्र मतिरेव त्याज्य

तामित्यनुसधेयंकर्त्रधीनत्वात्तेषांफलस्ययथाकामफलदातृत्वसामर्थ्यात्॥
नित्यत्वेनविधनादकरणेप्रत्यवायस्यश्रवणात्॥यद्वानात्रविभागःकार्यःपुत्रे
ष्ट्यात्मकानांवापीकूपारामोद्यानादीनांचकर्मणांस्वरूपेणैवत्यागोऽग्निहोत्रादि
षुकरणेप्रत्यवायजनकेषुचकामनात्यागइतिवेदेवाक्यभेदागमनयात्॥किं
तुसर्वत्रफलाभिसंधित्यागएवेष्टःनतुस्वरूपेणसर्वेषांवैदिकत्वात्वेदानांच
सर्वेषांनिःश्रेयसद्योतकत्वात्।परमाप्तत्वात्।तत्रनित्यानिनियतत्वेनानुष्ठे
यानितत्त्यागेप्रत्यवायश्रवणादितराणितुयथावकाशेनतस्मात्तदुदितंकर्म
स्वनुष्ठीयतामित्यारभ्यकाम्यमपित्यज्यतामित्यंतेनकाम्यनिषिद्धवर्जनपु
रःसरवेदोदितनित्यनैमित्तिकंकर्मेश्वरार्पणतयाऽनुष्ठीयतांश्रुतेस्तुभिरिति
विहितंभवति॥नन्वीश्वरार्थत्वस्यापिविनाशिफलसाधकस्यकर्मणोमोक्षंप्रति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बहिरंगत्वमपि कथं संगच्छतइत्याशंक्य ज्ञानोत्पत्तिप्रतिबंधकपापनिवृत्तिद्वा
रास्यान्मोक्षांगत्वमित्याह पापौघः परिधूयतामिति तत्र तावत् । पापान्यनेकजन्म
कृतदुश्चरितानि दुःसंस्कारानुमेयानि संसारनिर्मुक्तिसाधनविद्योत्पत्तौ सत्व
शुद्धिप्रतिरोधकानि यानि तेषामोघो निचयः परिधूयतां परिकरेण निवर्त्यतां वेदो
क्तेन काम्यप्रतिषिद्धपरिवर्जनपुरःसरेणेश्वरार्थानुष्ठानेन ज्ञानाधिकारप्रतिबं
धकपापनिवृत्त्या तत्कृतरागादिमालिन्यक्षालणेन रजस्तमोपहतिद्वारा सत्व
शुद्धिं साधयेदित्यर्थः तथा चाविद्यया मृतिं तीर्त्वा विद्ययाऽमृतमश्नुतइति श्रुतिस्त
त्राविद्यानामाविद्याकार्यत्वेन कर्म वर्णाश्रमधर्मरूपं तेन मृतिं पापं प्राणिनां विवे
काप्रदानेनानुदुःखप्रदानेन मृतप्रायं करोतीति तं तीर्त्वेति ॥ अत्र च सर्वासां प्र
वृत्तीनामविद्याकार्यत्वस्य तुल्यत्वेन न वर्णाश्रमधर्मस्य पापक्षयकरत्वमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७ त्तिनाशंकनीयं वेदप्रेरितत्वात्॥ तस्य वेदस्य च नियतप्रामाणिकत्वात्। निवृत्तौता
त्पर्याच्च॥ ननु पापौघः परिधूयतामित्यनेन सामान्यतः पापक्षयउक्तः सति कुतः स
त्वशुद्धिप्रतिबंधकस्यैव क्षयोत्रोच्यत इति चेन्नायं दोषः॥ विविदिषंति यज्ञेन दा
नेन तपसानाशकेनेत्यादिश्रुत्या विविदिषासाधनत्वस्योक्तत्वाद्यज्ञादीनां॥ त
स्मात् यः कश्चिन्निश्रेयोर्थी तस्य ज्ञानाधिकारसिध्यर्थं धर्मविधानात्तेन धर्मेण
सामान्यतः सर्वस्य पापस्य क्षयोऽभ्युपेयः किंतु सत्वशुद्धिप्रतिबंधकस्यैव शे न
षपापक्षयसाधनस्य च सत्वशुद्ध्यनंतरं श्रवणात्॥ तथाहि अविद्यया मृत्युं ती
र्त्वा विद्ययामृतमश्नुत इत्यादिश्रुतावर्थाज्ञानादेव पापक्षयउक्तोस्ति साक्षात्पा न
न्य पक्षयार्थामपि सर्वधर्मान्परित्यज्य ० अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि॥ स
र्वज्ञानप्लवेनैव वृजिनं संतरिष्यसीत्यादीनि भगवद्वाक्यानि संति॥ तस्मात्क

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्तव्यएवेश्वरार्थेनवेदोदितेनकर्मणापापक्षयोज्ञानाधिकारार्थंसत्वशुद्धिद्वारेति।
श्रुतिरपिधर्मेणपापमपनुदतीतिज्ञानमुत्पद्यतेपुंसांक्षयात्पापस्यकर्मणइति
स्मृतिरपि॥अथसत्वशुद्धेरनंतरंकृत्यमाह।भवसुखेदोषोनुसंधीयतामिति॥
भवोजन्मलक्षणसंसारस्तस्मिन्संसारेइहामुत्रभोगलक्षणंसुखंभवसुखं
तत्रतावदिहस्रक्चंदनवनितादिरमुत्रसुरेंद्रादिलोकेऽमृतपानस्वर्गांगना
दिदिव्यभोगएवंयद्भवसुखंतस्मिन्दोषैःनकोपीहामुत्रवासुखमनुभवत्य
स्यसुखस्यसर्वत्रदुःखोदर्कत्वादिहसम्राडप्यतृप्तकामःसर्वदातृष्णापीडितः
सन्सुखेष्वरनर्थासहिष्णुश्चदृश्यतेऽमुत्रचसुरेंद्रोपिध्वंसशंकापन्नोऽतृप्त
कामज्वरःसर्वदाऽसुरपीडितःश्रूयतेऽतोनेदंसुखंकिंतुदुःखोदर्कसुखाभा
सःकर्मजन्यत्वादस्यक्षणिकस्वभावत्वादतइदंममापिनसुखायभवतिवर्त्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मानकालेभविष्यत्कालेपिदुःखमेवस्यात्तथाचतद्यथेहकर्मजितोलोकःक्षीय
तएवमेवामुत्रपुण्यजितइत्यादिश्रुतिःभगवतापि।क्षीणेपुण्येमर्त्यलोकेविशंतीति
उक्तं।अनित्यमसुखंलोकमिमंप्राप्यभजस्वमामितिच।एवंयोभवसुखेदोषः
सोनुसंधीयतांनैरंतर्येणचिंतांकुर्यादितियावत्।नात्रसत्वशुद्धिबीजारोपणे
सतिवैराग्यफलचिंताऽसंगतेतिवाच्यंबीजारोपणमात्रेणसर्वत्रफलप्राप्तेर
दर्शनात्।तद्वदत्रापिसत्संगमादियोगेनसुखाभासेदोषानुसंधानंकार्यमेवा
भासस्यानिवार्यस्वभावत्वात्।एवमेतेनसत्वशुद्धिमनुशमाद्यंगत्वेनापात
तोविदितशास्त्रार्थद्वारोत्पन्नेननित्यानित्यवस्तुविवेकेनसहभवसुखेदो
षानुसंधानेननित्यानित्यवस्तुविवेकइहामुत्रफलभोगविरागश्चेतिसाध
नद्वयंदर्शितंभवत्यत्रानुक्तोपिनित्यानित्यवस्तुविवेकोविरागबीजत्वेनग्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञातु

मिति। आत्मेच्छानामात्मानं मिच्छामोऽस्येच्छेत्यर्थः सा व्यवसी ॥२॥

ह्यः॥ अथ शमादिसाध्यतामित्युद्दिश्य ज्ञानांतरंगसाधनतया तत्फल
भूतां बुभुत्सामभिमुखीकरोति। आत्मेच्छा व्यवसीयतांँ यतां निश्चीयतामयंभा
वो यद्यपि यदा काम्यनिषिद्धवर्जनपुरःसरेश्वरार्पणतया नित्याद्यनुष्ठाने
प्रवृत्तिः संजाता तदैवार्थात्सामान्यतो मोक्षेच्छाभिगमस्तत्प्रवृत्तिहेतुभूत
संभाव्यस्तथापि पुनस्तस्या एव प्रतिबंधनिवारणेन दृढत्वं यथा स्यात्तथा
सर्वत्रेच्छानिवारणेन मुमुक्षुस्तत्वजिज्ञासावान् भूयादिति अथैतस्या मुमुक्षा
याः साधनानीह वक्ष्यमाणानि यानि तेषां मध्येऽस्मिन् श्लोक आह॥ निजगृ
हात्तूर्णं विनिर्गम्यतामिति निजं गृहं दाराद्यनुबंधं तस्माद्गृहाच्चित्तमालिन्य
करत्वेन शमादिप्रतिकूलत्वात्तूर्णमतिशीघ्रं यदा विरागो जातस्तदैव विनिर्ग
म्यतां विशेषेण प्रमत्तेन सता गम्यतां ततश्चित्तं निष्काष्यतां जीवनार्थोऽस्यायो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सस्तस्माद्विनिवर्त्यममतादिशून्यतयागृहाद्यभिमानंपरित्यज्ययेनकेनोपाये
नप्रारब्धोपजीवितेनस्वाश्रमस्थितिमात्रंपरिकल्प्यशमादिसाधयेदित्यर्थः॥
ननुकुतोगृहाद्विनिर्गमनशब्देनगृहाद्यभिमानत्यागउक्तः कुतश्चाश्रमत्यागो
नाभ्युपेयतइतिचेन्नायंदोषः संजातवैराग्यपरिक्षामनुलक्ष्येहसर्वकर्मसं
न्यासस्यातिव्यवहितत्वेनविवक्षितत्वात्। अंतराचभगवद्भक्तेर्दर्शयिषित
त्वात्। अनधिकारेकर्मसंन्यासस्यानर्थ्यात्। अतोत्रगृहाद्गमनलक्षणेनतदभि
मानत्यागएवेष्टः। नाश्रमीनतिष्ठेदित्यादिशास्त्रादनेनचलक्षणतोवनस्थाश्र
मोदर्शितोभवति। एवमेतावत्प्रथमेरत्नेप्रथमतोब्रह्मचारिगृहिवनस्थाइत्या
श्रमत्रयधर्मनिरूपणेनब्रह्मजिज्ञासोत्पत्तौसत्वशुद्धिर्दर्शिताभवतितेनकर्म
कांडविषयस्यापिमोक्षोपकारित्वंनतुक्रियापरत्वमितिदर्शितंभवति। ततःश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माद्यंगत्वेननित्यानित्यवस्तुविवेचनेनस्येहामुत्रफलभोगलक्षणेभवसुखे
दोषानुसंधानतयाविरागोपिदर्शितइत्येकंरत्नं॥ छ॥ ॥अथद्वितीयरत्नमार
भ्यतेयत्रतत्वबुभुत्सायाःपरमोपायभूतायाःपरमफलपर्यवसायिन्यासुशि
क्षितयाभगवद्भक्त्यासहशमादिसाधनेसिद्धियुक्तसर्वकर्मसंन्यासाधिका
रंदर्शयन्सर्वकर्मसंन्यासंदर्शयत्याचार्यः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥
॥संगसत्सुविधीयतांभगवतोभक्तिर्दृढाधीयतांशांत्यादिःपरिचीयतांदृढतरं
कर्माशुसंत्यज्यतां॥सद्विद्वानुपसर्प्यतामनुदिनंतत्पादकेसेव्यतांब्रह्मैका
क्षरमर्थ्यतांश्रुतिशिरोवाक्यंसमाकर्ण्यतां॥२॥ ॥छ॥ ॥छ॥छ॥ ॥छ॥
तत्रतावद्देहाद्यभिमानंत्यक्त्वाकिंकार्यमित्यतआह॥ संगःसत्स्वितिसत्सुस
र्वशास्त्रार्थवित्तयासर्वैषणात्यागेनसद्रूपेभगवतिवासुदेवेपराभक्तिर्येषांते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षु संगः प्रणिपातादिना तदाज्ञापरिपालनेन च तान्निकटे वासो विधीयतां क्रिय
तां तत्र च किं कार्यमित्यत आह। भगवतो भक्तिर्दृढा धीयतां। भगवान् श्रीवासु
देवः सर्वांतर्यामी जगतः कर्त्ता हर्त्ता पालयिता सर्ववेदतात्पर्यावधिभूतो भक्तै
कशरणः कल्याणनिदानं योऽभिध्येयः स्वलीलया यश्चासुरकुलमर्दनसा
धुपरित्राणसुदामदारिद्र्यभंजनद्रौपदीलज्जानिवारणपुंडरीकादिमुनि
वरदः सर्वपापप्रभंजनो यस्तस्य भगवतः सज्जनशिक्षितश्रवणकीर्त्त
नध्यानादिना भक्तिरनुरागलक्षणा दृढाऽनन्यतया तैलधारावत् अव्य
भिचारिण्याधीयतां संपाद्यतामिति यावत्॥ अनेन भगवद्भक्तेरेव वीर्यव
त्तरत्वेन शमादीनां वीर्यप्रदानेन बुभुत्सोत्पत्तिद्वारा श्रवणादिनाऽविद्यानि
वृत्त्या परमानंददायिनीति विज्ञेयं॥ गीतासु च स्वस्वकर्मणा तमभ्यर्च्य सिद्धिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विंदतिमानवइत्यादिनासाधनकालेभगवद्भक्तिरेवधर्मसहकारिणीसती
सत्वशुद्धिप्रदानेनवैराग्योत्पादिकाभवतितत्तूंस्वफलकालेपिब्रह्मभूतःप्रस
न्नात्मानशोचतिनकांक्षति। समःसर्वेषुभूतेषुमद्भक्तिंलभतेपरामितिभक्त्या
मामभिजानातियावान्यश्चास्मितत्वतः॥ ततोमांतत्वतोज्ञात्वाविशतेतदनं
तरमित्यादिनाभगवतास्वभक्तेःफलपर्यवसायित्वंदर्शितंभगवत्पतोभगव
द्भक्तिरेवसर्वोपायभूतासाचावश्यकतयाभ्यसनीयेतिविज्ञेयं॥ विशेषतश्च
कलिदुषितमानसैःसर्वेषांधर्माणांनियतत्वेनवैकल्यनिष्पत्तेःकिंबहुनोपा
सनाकांडस्यवेदस्यद्विकोटित्वेनापिपूर्वोत्तराणांनिःश्रेयससाधनानांसह
कारित्वेनभगवद्भक्तेरेवफलपर्यवसायियित्वंविज्ञेयं तत्रपूर्वेसत्वशुद्धिकारा
णांतत्कर्तृत्वाभिमानदूरीकरणेनतेषांनियतफलनिवारणेनचतत्फलभूतैं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्वशुद्देश्चक्षेमंकरत्वेन। उत्तरेषांशमादिनांच झटितिफलपर्यवसायित्वे सामर्थ्यप्रदानेन। तस्मात्परमा निश्रेयसार्थिनाभगवदेकशरणसंनिधौभगवद्भक्तिर्यथादृढास्यात्तथा कर्त्तव्यमितिसिद्धं। अथसंजातविरागेणलब्धभगवत्प्रसादेनचित्तैकाग्र्यतयाभगवध्याननिष्ठयासंप्राप्तशमादिनाप्राप्ताधिकारेणाप्यप्रमत्ततयास्वाधिकारपरामर्शः कर्त्तव्यइतिमनसिनिधायाह। शांत्यादिःपरिचीयतामिति। शांत्यादिःशमादिःशमोदमोपरतितितिक्षासमाधानश्रद्धेतिषट्कंशांतोदांतइत्यादिश्रुतेःपरिचीयतामभ्यस्यतांविवर्ध्यतामितियावत् तत्रतावछमोंतर्निग्रहः श्रवणकीर्त्तनध्यानादेरन्यत्रमनोवृत्तेर्निवारणं॥दमोबाह्येंद्रियवृत्तीनांश्रवणादेरन्यत्रस्वविषयेभ्यःपरावृत्तिः। उपरतिःसंपादितशमदमांतःकरणस्याभ्यासमनपेक्ष्यनिर्विक्षिप्ततयाध्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नादौवृत्तिस्थैर्यंतितिक्षाचशीतोष्णादिद्वंद्वसहनंपरमानंदावाप्त्यभिमुखतया
सततंसंप्राप्तोल्लासेनमनसायदृच्छयोत्पन्नद्वंद्वैरहतमानतेत्यर्थः।श्रद्धागुरुवे
दांतवाक्येषुविश्वासः समाधानंचसर्वत्यागश्रवणेपिमोक्षसाधनोत्साहः एवमे
तेनात्मेच्छाव्यवसीयतामित्युक्त्वागृहादिनिर्गम्यतामित्यारभ्यशांत्यादिःपरिची
यतामित्यंतेनयेतस्याजिज्ञासायाउपायाःसुचितास्तैरुपायैरात्मजिज्ञासासि
द्धिरभ्युपेया॥अथजिज्ञासुनाश्रवणाद्यर्थंसर्वविक्षेपपरिहारायसर्वकर्मसंन्या
सःकर्त्तव्यइत्याह।दृढतरंकर्मासुसंत्यज्यतामिति।दृढतरंजडंविक्षेपकरंस
दाराग्निहोत्रादिसाधनंनित्यनैमित्तिकंयावज्जीवमग्निहोत्रंजुहुयादित्यादिना
वेदविहितमपिश्रवणादिप्रतिकूलतयातमेतंवेदानुवचनेनविविदिषंतिब्राह्म
णायज्ञेननतपसानाशकेनेतिनकर्मणाप्रजयाधनेनत्यागेनैकेऽमृतत्वमान

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रुरित्यादिवेदतात्पर्यं ज्ञात्वाशुत्वरयायदावेदांतेषुबुभुत्साजाता तदैवाऽप्रतिबं
धेनसतासंत्यज्यतां सम्यक्प्रकारेणप्रसन्नातःकरणोनसंत्यज्यतामित्यर्थः न
चवेदानां क्रियार्थत्वादतदर्थानांचानर्थक्यात्स्वर्गादिविशिष्टः कर्मसाध्य एव मो
क्षस्तत्र दुःखविनाभूतसुखयावाप्त्योःश्रवणात् न तु ज्ञानसाध्यः न च ज्ञानसा
ध्यमोक्षानंगीकारे तत्प्रतिपादकानामुपनिषद्वचसांवैयर्थ्यं स्यादिति वा
च्यं तेषांविध्येकवाक्यतया कर्मकांडे सार्थत्वानूत्ववदभिमतस्य मोक्षस्यात्म
तृ स्वरूपत्वेन स्वतःसिद्धत्वाज्ज्ञातार्थज्ञापकत्वेन वेदस्यापि वैयर्थ्यं स्यात्स
र्वैः सततं सर्वास्ववस्थास्वनुभूयमानेप्यात्मनि दुःखनाशस्यादर्शनादतो
विहितस्यकर्मणएवसुखहेतुत्वं नतुतत्यागादृष्टः विहितप्रतिसिद्धयोःपु
ण्यापुण्ययोःसुखदुःखफलयोःसर्वैरनुभूयमानत्वादितिवाच्यं॥स्वर्गा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दीनां विनाशित्वस्य श्रवणात् लब्ध्वेह कर्मजितो लोकः क्षीयत एवामुत्र पुण्य
दि जितोपीत्यादिश्रुतेः॥ क्षीणे पुण्ये मर्त्यलोके विशंति॥ एवं त्रयीधर्ममनुप्रपन्ना ग
तागतं कामकामा लभंते॥ अनित्यमसुखं लोकमिमं प्राप्य भजस्व मां॥ इत्या
दि भगवद्वचनाच्च॥ तदनुभवकालेपि तुल्यानिशयध्वंसशंकाकुलत्वस्य श्र
वणात्॥ अतो न तदधिगतानां तत्त्वोपजीविनां मोक्षसिद्धिः स्यात्॥ तस्य सु
खाभासत्वात् फलश्रुतीनां च रोचनार्थत्वात्॥ तत्सुखाभासस्याप्यनैकांति
कत्वस्योक्तत्वात्॥ लोकेपीह ब्रह्मात्मज्ञानेतरमहत्सुखाभावेपि तत्तापोप
शमस्यादर्शनात्। संप्राप्ताभिलषितः पुमानपि तृष्णासंततिं करोत्येव तस्या
निरस्ताविद्यात्मावधित्वात्॥ तस्मान्न साक्षात्कर्मणो मोक्षसाधनत्वं। किंतु
ब्रह्मात्मज्ञानस्यैव। बंधस्याविद्यकत्वात्॥ उपनिषद्वचसां च यत्तु विध्येकवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्यत्वेन सार्थत्वमुक्तं तदप्यसत्॥ ज्ञानकर्मवाक्यानां विरुद्धत्वेन भिन्नार्थत्वा
त्॥ भिन्नाधिकारकत्वाच्च। तत्रोपनिषद्वाक्यैर्विषयविरागिणं प्रति निरविद्यं
ब्रह्मात्मत्वं द्योत्यते कर्मवाक्यैश्च रागिणं प्रति स्वर्गादिफलं। ज्ञानाधिकारसि
द्धौ च निःकामतया सत्वशुद्धिरनेन कर्मकांडस्यापि सार्थत्वं विज्ञेयं॥ अथ त्व
दभिमतस्य मोक्षस्यात्मस्वरूपत्वेन स्वतःसिद्धत्वाज्ज्ञानार्थज्ञापकत्वेन वेद
स्यापि वैयर्थ्यं स्यात्॥ सर्वैः सततं सर्वास्ववस्थास्वनुभूयमाने आत्मनि
दुःखनाशस्यादर्शनात्। अतो विहितकर्मण एव सुखहेतुत्वं न तु त्यागइष्ट त
इति यदुक्तं तदप्यसत् सर्वत्र सोपाध्यात्मस्फुरणस्य तु प्रमाणजवृत्त्यधीन
त्वात्। एवं नित्यप्राप्तस्य स्वतःसिद्धेप्यात्मन्यविद्याकृतव्यवधानेन मामहं न जा
नामीति प्रत्ययसिद्धं ज्ञानार्थत्वं दृश्यत एव तत्कृतदुःखानुभवोपि पुनस्तदवि

त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्यानिवृत्तौदुःखनिवृत्तिरपिकर्मजितत्स्यक्षयोपिश्रुतौज्ञानैकसाध्यएवमोक्षो
नतुकर्मसाध्यः नतुसाक्षात्वेनकर्मणोज्ञानसाधनत्वेवाऽतोधिकृतस्यज्ञाना
र्थत्वेनविधिनातत्यागएवइष्टः नचमास्तुकर्मणोज्ञानार्थत्वेविहिताकरणप्रत्य
वायपरिहरणप्रतिबंधात्तुनविहितानांत्यागइष्टः किंतुज्ञानकर्मणोःसमुच्चय
एवास्तुतत्राविद्यानिवृत्तौज्ञानंप्रत्यवायपरिहरणेकर्मेतिवाच्यंज्ञानस्यप्रमात्व
त्वोपमर्दनहेतुत्वात्कर्मणश्चप्रमात्वसत्वसिद्धत्वात्॥ एवंचज्ञानकर्मणोःस्थिति
गतिवद्विरोधान्नेहखलुनिःसारेसंसारेसंजातदुःखानुसंधानस्यपुंसोमुमुक्षो
र्ज्ञानकर्मसमुच्चयइष्टः नचकेषुकेषुचिन्जनकश्रुतदेवप्रभृतिषुसमुच्चयोपिदृ
ष्टः कुतोत्रवार्यतइतिवाच्यंतेषांभगवदेकशरणानांत्यक्तसर्वैषणानांकेनापिप्रार
ब्धैकप्रतिबंधेनविद्वत्तयाबुभुत्सयाःसमाप्यावाऽकृतविधिवत्कर्मसंन्यासा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नामपित्यक्त्वा सर्वैषणात्वनिरस्ताभिमानत्वभगवदेकशरणादिगुणतः संन्यास
एवाभ्युपेयते संजातफलस्यापि प्रपत्तेः प्रमाणतोपि ज्ञानादेव तु कैवल्यं। मत्वा
धीरो हर्षशोकौ जहाति। तरति शोकमात्मवित्। तमेकं विदित्वातिमृत्युमेतीत्यादि
श्रुतिभिर्मोक्षस्य ज्ञानैकसाध्यत्वं प्रतिपाद्यते संन्यासस्य च ज्ञानार्थत्वमभ्युपेय
ते संन्यस्य श्रवणं कुर्यादित्यादिवाक्यात् तस्मात्। प्रारब्धप्रवाहतो ब्रह्मचारी
वनी गृही वाऽकृतसंन्यासोपि केनापिहजन्मनिजन्मांतरे कृतपुण्येन प्रतिबंध
कदुरितनिवृत्त्या प्राप्ताधिकारः सन् ज्ञानी चेत्। तर्हि सोपि नकर्मीत्यभ्युपेयं॥
संन्यासस्य ज्ञानप्रधानत्वात्॥ भगवतापि। कर्मण्यकर्म यः पश्येदकर्मणि च क
र्म यः॥ स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत्॥ यस्य सर्वे समारंभाः का
मसंकल्पवर्जिताः॥ ज्ञानाग्निदग्धकर्माणं तमाहुः पंडितं बुधाः॥ त्यक्त्वा कर्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

फलासंगं नित्यतृप्तो निराश्रयः॥ कर्मण्यभिप्रवृत्तोपि नैव किंचित्करोति सः॥ इ
त्युक्तं॥ अतो न कुत्रापि ज्ञानकर्मसमुच्चयोऽभीष्टः दृष्टमपि कुत्रचित् विधिप्रतिषेध
परिपालनं तल्लोकसंग्रहसंरक्षणमात्रं न तु गुणदोषदृष्ट्या नागवलेपि दोषबुध्यो न
यातीतो निषेधान्न निवर्त्तते॥ गुणबुध्या च विहितं न करोति यथार्भक इति अत्र गुण
दोषदृष्टिराहित्येन। प्रवाहितो विहितकरणे प्रतिषिद्धत्यागेपि न स किंचित्करोतीत्यु
क्तं भवति। विधिप्रतिषेधकयोरप्रयोजकत्वात्॥ वितृष्णत्वादंभित्वामानित्वनिरभिल
षित्वशांत्यादिगुणतुल्यत्वे नाकृतसंन्यासिषु कृतसंन्यासिषु न विशेषः प्रतिपद्य
त आश्रमतस्तु स्याद्विशेषः॥ साधनतः फलतो चोक्तगुणविरहे तु न कोपि संन्यासी
ति विज्ञेयं स साधनस्य ज्ञानस्य दुर्लभत्वात्। अत्राकृतसंन्यासी परमार्थज्ञानीति पू
र्वाभ्यासबलेन कुत्रचिद्दृष्टव्यो न सर्वत्र विक्षेपकरत्वात्स साधनस्य कर्मणः तस्मात्सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पादितज्ञानाधिकारस्यमुमुक्षोःकर्मत्यागएवेष्टः॥सचकथंक्रियोमित्यतआह॥
सद्विद्वानुपसर्प्यतामिति॥तत्रसद्विद्वांस्तुकालत्रयाबाधितसर्वसत्तास्वरूपसन्मा
त्रंपरमात्मवस्तुयत्तद्विदितवान्वेदांतवित्ब्रह्मनिष्ठइत्यर्थः॥श्रोत्रियंब्रह्मनिष्ठंगु
रुमुपसरेदित्यादिश्रुतेः॥अत्रापिश्रोत्रियपदेनानधीतस्यनिषेधोद्रष्टव्योब्रह्मनिष्ठ
पदेनाशांत्यादेस्तस्माद्ब्रह्मनिष्ठःसन्[illegible]ष्यबोधनसामर्थ्यवानितियावत्सउपसर्प्य
तां॥ससमित्पाणिरितिविधानात्प्रपन्नतयातन्निकटेगम्यतामित्यर्थः॥अथतत्राभिग
म्यकिंकार्यमित्यतआह॥अनुदिनंतत्पादुकेसेव्यतांतत्तस्यगुरोःपादुकेचरणौनै
रंतर्येणाभिवंदनादिनाप्रपन्नतयासेव्यतामुपास्यतां॥स्वाभिलषितंपरमकल्याणं
मनस्यनुसंधायत्वंहीनिजचरितानुसारतस्तेपरमदयाळवोगुरवःकरुणाक
लितेनचित्तेनवरदानाभिमुखाःसंत्वितिविचिंत्यतन्निकटेस्थीयतामित्यर्थः॥अथते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रसन्नाः संतोवादाभिमुखाअभिसंजाताइतिज्ञात्वातेषुब्रह्मैकाक्षरमर्थ्यतामितिब
ह्मैकाक्षरंनामसर्ववेदबीजभूतमोंकारःससार्थःप्रार्थ्यतामिति॥ ततश्चतेकरुणानि
धयःशिष्यचरितानुमोदिताःसंतोधिकारिणंज्ञात्वातस्मैविधिवत्संत्यक्तकर्मणेश्र
तसत्त्वंप्रदायब्रह्मैकाक्षरायज्ञानांनैंतरंगंसाधनंयदुपदिशंतितदाकर्ण्यतामित्या
ह॥ श्रुतिशिरोवाक्यंसमाकर्ण्यतामिति॥ श्रुतीनांशिरसिसर्ववेदतात्पर्यभूतोपाध्य
नुपहितदिक्कालाद्यनवच्छिन्नब्रह्मप्रतिपादनपरायाउपनिषदस्तासांवाक्यंतन्नि
र्मथितमेकांतिकत्वेनब्रह्मात्मैकत्वबोधकंयत्तत्त्वमस्यादिसमाकर्ण्यतांसम्य
क्श्रवणप्रकारेणश्रूयतां॥ यथावाक्यार्थावबोधःस्यात्तथेतियावत्॥ इतिद्विती
यरत्नंसमाप्तं॥ २॥ अथतृतीयमारभ्यते॥ तत्रातीतानंतरश्लोकांतेवाक्यंसमाक
र्ण्यतामित्युक्तंसवाक्यश्रवणप्रकारोयथातदर्थावबोधःस्यात्तथादर्शयितव्योनो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चेद्वाक्योपदेशस्य वैय्यर्थ्यं स्यान्नू नोत्पद्यते विना ज्ञानं विचारेणान्यसाधनैरिति
वचनादिति मनसि निधायाहाचार्यः ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ
०॥ वाक्यार्थश्च विचार्यतां श्रुतिशिरःपक्षः समाश्रीयतां दुस्तर्कात्सुविरम्यतां श्रुति
मतस्तर्कोनुसंधीयतां ॥ ब्रह्मास्मीति विभाव्यतामहरहर्गर्वः परित्यज्यतां देहे ऽहं
मतिरुज्झ्यतां बुधजनैर्वादः समुत्सृज्यतां ॥ ३ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ
वाक्यं तु यत्पूर्वं दर्शितं तत्त्वमस्यादि तस्यार्थः साक्षात्त्वेन ब्रह्मात्मैकत्वं स विचा
र्यतां तस्य विचारो यथा संप्रतिपद्येत तथा कर्त्तव्यस्तत्र तावद्वाक्यगतपदपदा
र्थविवेकद्वारका वाक्यार्थसिद्धिरिति सर्वत्र व्याप्तिरिति कारणादादौ पदपदार्थ
विवेकः कर्त्तव्यः पदानि तु तत्त्वमसीति त्रीणि ॥ तत्रासीति पदं तत्त्वंपदयोरन्वय
हेतुभूतं सत् निर्विशिष्टसत्तानुवादकं ॥ तस्या सिद्धार्थस्यैव पदार्थद्वयशोध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नतः सिद्धिरिवाभिव्यज्यते ॥ अथ तत्त्वमिति द्विपदे तत्रैकैकस्य द्वौ द्वावर्थौ वाच्यो ल
क्ष्यश्चेति ॥ तत्र तावत्तत्पदस्य सर्वसाक्ष्यंतर्यामी सर्वप्रकाशक इत्यादिर्वाच्यार्थ
श्च ध्यस्तसंबंधग्रहणेन सत्यं ज्ञानमनंतमनंतरबाह्यस्वयंज्योतिरित्यादिनोपपा
दितमुपहितचैतन्यं लक्ष्योर्थः ॥ त्वंपदस्य च सुख्यहं दुःख्यहं कर्त्ता भोक्ता गौ
रश्यामादिगुणकोहमित्यादि यथा महामत्स्य उभे कूले अनुसंचरति तथाऽवस्था
त्रयेषु परिवर्त्तत इत्यादिनोक्तो वाच्यार्थः हृदयं तज्ज्योतिः शिवमद्वैतं चतुर्थं ॥ त्रिषु
धामसु यद्भोग्यं भोक्ता भोगाश्च यद्भवेत् तेभ्यो विलक्षणः साक्षीत्यादिनोक्तमुपा
ध्युपहितं लक्ष्यार्थोऽत्रोभयलक्ष्यार्थयोः स्वरूपतो विशेषोपि व्यापृष्टिसमष्ट्यभिप्राये
ण विशेषः प्रतिपत्तव्यः एवमुक्तलक्षणानां चतुर्णां पदार्थानां मध्ये वाच्यार्थयोस्त्या
गेन लक्ष्यार्थयोः पसेक्षापरोक्षभावनानुगतज्ञाननिवृत्त्या वाक्यं ब्रह्मात्माखंडार्थ
रो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बोधकं प्रभवति॥ नन्विह पदमर्यादया वाच्यार्थविव प्रतीयेते कुतो लक्ष्यार्थाभ्युपग
म इति चेन्नायं दोषः पदार्थस्य वाक्यतात्पर्याधीनत्वात्॥ तथाहि देशकालाद्यनव
च्छिन्ने ब्रह्मात्मनि तद्विषयाश्रयानिर्वचनीयाविद्याकृत कार्यकारणप्रपंचावच्छिन्न
जीवेशभेदनिवृत्त्याऽनन्यसिद्धाखंडार्थबोधाय यत्प्रवृत्तं तत्त्वमस्यादिवाक्यं त
ल्लक्षणयैव न मुख्यया वृत्त्या गौण्या वा जातिवर्णगुणादिवैशिष्ट्यरहितत्वाद्ब्रह्मा
त्मनोऽतो न विरुद्धं लक्ष्यार्थग्रहणं॥ अतश्च तत्त्वमिति पदयोः सामानाधिकर
ण्ये लक्ष्यार्थयोरविरोधेपि वाच्यार्थयोर्विरोधस्फुरणे सति लक्षणैव ग्राह्या सा
पि त्रिविधा जहल्लक्षणाऽजहल्लक्षणा जहदजहल्लक्षणा चेति तासां तिसृ
णां च मध्ये चरमैव ग्राह्या सोयमितिवदुभयदेशकालविशिष्टत्वत्यागेन वस्तु
मात्रग्रहणरूपा न जहल्लक्षणाऽजहल्लक्षणा वा जहल्लक्षणायां तु॥ गंगायां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घोषवत्स्वार्थपरित्यागेनतीरवदन्यत्राविनाभूते॰संबंधः स्यात्सतुनाभीष्टो
त्रासंगोदासीनत्वाद्ब्रह्मात्मनः अजहल्लक्षणायोमपिषोणोधावतीतिवत्स्वार्था
परित्यागेनान्यत्रवृत्तिर्नयुक्तःपरिछिन्नस्वरूपत्वाद्ब्रह्मणःऽशेषतोत्रपदार्थ
योरविरुद्धत्वाभावाद्भागतश्चविरुद्धत्वात्॥शोधितपदार्थस्यब्रह्मास्मीति
स्फुरणात्॥तस्मादुक्तप्रकारयाभागलक्षणयैवोपनिषद्वाक्यंब्रह्मात्मैक्यं
बोधयतीतिविज्ञेयं॥ननुत्वंपदार्थस्यजीवस्यदेहादिविशिष्टस्यदेहाद्यवि
विक्तत्वेनप्रतीतौसत्यांकथंवाच्यलक्ष्यभागद्वयंस्फुरतियेनोक्तलक्षणयाब्र
ह्मास्मीतिस्फुरणंस्याच्छास्त्राच्चेत्शास्त्रमपिकथमप्रसिद्धार्थंबोधयतीति
चेन्नायंदोषोभ्रमकल्पितत्वाद्देहादिवैशिष्टस्यानावृतब्रह्मविषयत्वाद्गुरुशास्त्र
स्यचतस्मात्सत्यानृतयोरधिष्टानाध्यस्तयोरज्जुभुजंगवद्भ्रमकल्पितेकत्वया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१८

सेन सत्यानृतभागस्याच्छन्नयो रज्जुभुजंगवद्भ्रमकल्पितैकत्रवासेन सत्यानृत
भागस्योद्वृत्तत्वेन सत्यपि देहादिविशिष्टात्मप्रत्यये शास्त्राचार्यप्रसादान्नेति ने
तीति शास्त्रार्थबोधानुस्यूतां सत्यानृतविभागो॥ तथाहि निर्विशेषसच्चिदानं
दस्वरूपाद्ब्रह्मणः स्वमहिम्नैवाविकारतयाऽनाद्यविद्यानुग्राहकत्वेन तत्कृत
जीवादृष्टानुग्राहकत्वेन च सविशेषत्वप्रतिपत्त्यात्मन आकाशः संभूत इत्यादि
श्रुतिप्रतिपादिताध्यारोपितभूतभौतिकव्यष्टिसमष्ट्युत्पत्तिद्वारेणोत्पन्नेषु चि
द्विलोञ्झितेकोशपंचकात्मके देहादौ तत्सृष्ट्वा तदेवानुप्राविशदित्यादिश्रुति
प्रतिपादिततदवच्छिन्नतया तदहं मम चेति चैतन्यतादात्म्येन सत्यानृतावृ
त्याहं सुखी दुःखी स्थूलः कृशः कर्त्ता भोक्तेत्यादिप्रत्ययवंतः कृतकर्मफलभुं
जानाः सर्वे प्राणिनस्तिष्ठंति तेषां मध्ये केनचित्सुकृतेन यः कश्चिदुत्कृसाध

ससं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नसिद्धः प्राप्ताधिकारस्तस्मात्अधिकारिणे यत्सत्यज्ञानाद्यवाँ वेदांतवाक्यैर्नि
र्विशेषं ब्रह्मोच्यते। यच्चसदेवसोम्येदमग्रआसीदितिसृष्टेः पूर्वंसत्तास्वरूपंदर्शि
तं॥ यतोवाइमानिभूतानिजायंते येनजातानिजीवंतीतिसृष्टिकालेपिसृष्टेरभि
न्नंनिमित्तोपादानमुक्तंतत्त्वमितिमहावाक्येनगुरुरुपदिशति॥ तद्वाक्यार्थप्रति
पत्तौपदार्थविवेकंगताः श्रुतिर्नेतिनेत्यादिनापदार्थशोधनप्रकारंदर्शयतिसचत
च्छुत्यर्थमनुसृत्य ययाकयाचित्प्रक्रिययापदार्थशोधनेनसत्यानृतावृत्तिभंगे
नवाच्यलक्ष्यार्थविभागज्ञो वाक्यार्थप्रतिपद्यते॥ तत्रतावत्त्वंपदशोधनेत्वंपदा
र्थस्यजीवचैतन्यस्यपंचकोशविवेकस्तत्रान्नमयप्राणमयमनोमयविज्ञान
मयानंदमयाइतिपंचकोशास्तत्रान्नमयः स्थूलदेहविशिष्टंतस्यान्नोपजीवन
त्वात्सनेतीतिनात्माभवतीत्यनेनत्वंस्थूलकृशह्रस्वदीर्घगौरश्यामादिस्वरूपो।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्राह्मणादिवर्णस्वरूपो वा ब्रह्मचर्याद्याश्रमात्मकश्चेत्युपपत्त्या श्रुतिः सानुबंधा
स्थूलाभिमानं त्याजयति॥ ननु प्रत्यक्षतः प्रतीयमानस्य स वा एष पुरुषोन्नरसम
य इत्यादिश्रुत्योक्तस्य च कथं निरासः क्रियते को वाहं यदात्मा वल्लबेन नाहं स्थू
ल इति प्रत्ययः स्यादिति चेत्त्वं तु त्वमेव सततं साधारणाहं प्रत्ययावधिरध्यस्ता
सु सर्वास्ववस्थास्वनुस्यूतो नान्यः कश्चित्के न चिद्विशिष्टः पश्वादिविषयोवि
शेषाणां वाभिचारदर्शनात्॥ श्रुत्यापि अन्योंतर आत्मा प्राणमयः तेनैष पूर्ण इ
त्यादिनोंतरादंतरं दर्शयित्वानंदमयस्य ब्रह्मपुच्छं प्रतिष्ठेत्यादिनोंतरादंतरं द
र्शयित्वानंदमयस्य ब्रह्मपुच्छं प्रतिष्ठेत्यादिनात्मनो ब्रह्मपर्यवसायित्वं दर्शय
त्यं ते चैतमन्नमयमात्मानमुपसंक्रामतीत्यादिना सर्वकोशव्यतिरिक्तत्वेनानं
दं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेत्यादिना सर्वसंबंधातीतत्वं दर्शितं॥ भगव

तापिमत्तः परतरं नान्यत्किंचिदस्ति धनंजयेत्यादिना। एवमेतत्तात्पर्येण स वा ए
ष पुरुषोन्नरसमय इति श्रुतिः सोपानमार्गेणात्मनोऽखंडाद्वितीयत्वं दर्शयति। तत्र
तावत् स वा एष पुरुषोन्नरसमय इत्यनेन स्थूलावच्छिन्नात्मचैतन्यावलंबेन पुत्रा
द्यात्मतादात्म्यं त्याजयति॥ ततश्च सूक्ष्मशरीरावयवप्राणमनोविज्ञानमयकोश
त्रयतादात्म्यं क्रमतो निवारयति॥ तत्रान्योंतर आत्मा प्राणमयः॥ तेनैष पूर्ण इत्य
नेन स्थूलस्य कर्मेंद्रियैः सह प्राणतंत्रत्वात् प्राणाद्यवच्छिन्नचैतन्यावलंबेन
न त्वं स्थूल इति स्थूलं तादात्म्यं वारयत्यहं स्थूल इति प्रत्ययसाक्षित्वात्तव॥ त
तोऽन्योंतर आत्मात्मा मनोमय इत्यनेन ज्ञानेंद्रियैः सह मनसि विलीने सति क
र्मेंद्रियाणां प्राणेन व्यवहाराक्षमत्वात्कर्मेंद्रियाणां प्राणस्य च मनस्तंत्रत्वान्मनो
वच्छिन्नचैतन्यावलंबेन कर्मेंद्रियैः सह प्राणतादात्म्यं वारयति॥ न त्वं कर्मेंद्रिय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णिप्राणोवेति॥अहंप्राणोममप्राणइतिवाममवाक्पाण्यादीनीतिचप्रत्ययसा
क्षित्वात्तवततश्चान्योंतरआत्माविज्ञानमयइत्यनेनज्ञानेंद्रियैःसहकामसंक
ल्पादिधर्मकस्यमनसःसर्वप्रमेयव्यवसायात्मकबुद्धितंत्रत्वाबुध्यवच्छिन्न
चैतन्यावलंबेनज्ञानेंद्रियैःसहसधर्मकमनस्तादात्म्यंवारयतिनत्वंमन
श्चक्षुरादीनीतिमनसिसुप्तेहंसुप्तश्चक्षुरादौसुकल्पेविकलेवाहंसुकल्पो
विकल्पोवेतिप्रत्ययसाक्षित्वात्तव॥ततश्चान्योंतरआत्मानंदमयइत्यनेन
सुषुप्तेरानंदप्रचुरत्वात्सुषुप्त्यनुमेयाज्ञानघनकारणदेहावच्छिन्नचैतन्याव
लंबेनबुद्धितादात्म्यंनिवारयति॥नत्वंबुद्धिरितिअहंजानामिसुखोहंविज्ञो
हमित्यादिप्रत्ययसाक्षित्वात्तवातस्त्वंव्यतिरिक्तएवंमेतेनलिंगदेहातीतत्वेनन
सुखित्वदुःखित्वकामक्रोधादिमत्त्वनिरत्वात्सर्वसंबंधातीतसुषुप्त्येकसिद्ध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नंदमात्रत्वं सर्वावस्थावच्छिन्नत्वेन सर्वव्यापकत्वं च दर्शितं॥ तथैव तस्य सौषुप्त्या
नंदस्य ब्रह्मपुच्छं प्रतिष्ठेत्यनेन तस्याहंकृतानंदसाक्षित्वमपि न किंचिदवेदिषं सुख
महमस्वाप्समिति प्रत्ययसाक्षित्वात्॥ तस्मादुक्तक्रमेणात्मनः परमानंदाद्विती
यत्वे एव श्रुतितात्पर्यं॥ किंच नेति नेतीति निषेधस्यानिवार्यत्वादनिषेधावस्त्वव
धित्वेन यद्यद्व्यभिचारिसाक्षिवेद्यं वस्तु निषेधार्हं निषिध्यते तत्सर्वं नात्मेति त
स्य व्यभिचारिस्वरूपत्वाद्दृश्यत्वादिति विज्ञेयं॥ एवं त्वंपदार्थशोधनक्रमो दर्शि
त एतेन च सर्वेषां स्थूलसूक्ष्माणां भौतिकत्वतुल्यत्वादज्ञानस्य चाविशेषत्वा
त्॥ व्यष्टिसमष्ट्यैक्याभिप्रायेण विराड्हिरण्यगर्भाज्ञानसाक्षित्वात्॥ तत्पद
शोधनमपि दर्शितं भवति॥ न च नेति नेतीति निषेधस्यानियमत्वात् साक्षिणो
पि निषेधः कृतो भवति तन्निषेधेन च शून्यमेवाभ्युपेयमिति वाच्यं॥ शून्यप्रत्यय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तन्निषेधेन च शून्यमेवाभ्युपेयमिति वाच्यं॥ शून्यप्रत्ययस्य साक्षिवेद्यत्वादसाक्षि
वेद्यत्वाच्च शून्यस्यैवासिद्धिः स्यात् तस्य प्रतीतिकर्तृत्वाच्च तथा च तमेव भांतमनुभा
ति सर्वं तस्य भासा सर्वमिदं विभातीति श्रुतिः॥ नहि द्रष्टुर्दृष्टेर्विलोपो विद्यतेऽवि
नाशित्वादिति च जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचं यत्प्रकाशयते तद्ब्रह्माहमिति ज्ञात्वा
सर्वबंधैः प्रमुच्यत इति च तस्मात्सर्वश्रुतितात्पर्यात्॥ सर्वत्र सर्वसाक्षित्वानुभ
वाच्च। नेति नेतीति निषेधोस्य साक्षिस्वात्मनिषेधार्हः किंतु प्रथमेन सकार्या
ऽविद्या निषिध्यते॥ द्वितीयेन निषेधोपि स्वाविद्यायाश्चित्स्वरूपे सततमसंघट्ट
नात्॥ नित्यं ज्योतिरिति श्रुतेश्च एवं यः शोधितपदार्थस्तस्य तत्त्वमस्यादिमहा
वाक्यमवांतरोपनिषद्वाक्यैः साक्षाद्ब्रह्मात्मैक्यबोधकं भवति न च साक्षिणः
साक्ष्यपेक्षत्वात् साक्ष्यसत्वे कथमद्वयानंदब्रह्मात्मावबोधः स्यादिति वाच्यं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुषुप्त्यादौ विशेषस्यादर्शनात् ज्ञायत्स्वप्नविशेषाणां चान्वयव्यतिरेकेण विवेकवि
लसितप्रातीतिकत्वात्। अविवेकस्यानिरूपितरूपत्वेन प्रतीतेश्चिदभिन्नत्वान्न
संततं चिन्मात्रं वस्तु सविशेषं प्रतिपत्तव्यमिति लाघवेन विज्ञेयं॥ अथात्रोत्तमाधि
कारी चेदेतल्लक्षणवाक्यस्य सकृच्छ्रवणमात्रेण स्यात्कृतकृत्यः श्रवणाद्यभ्या
सस्यातीतजन्मसिद्धत्वात् अनुत्तमाधिकारी चत्तेन श्रवणमनननिदिध्यास
नैः संस्काराधानात् संभावनानिवृत्तिविपरीतभावनाविनाशैर्वाक्यार्थावधारण
सामर्थ्यद्वारा वाक्यार्थावगत्या परमानंदस्वरूपेण स्थीयतामिति मनसि निधा
याहाचार्यः श्रुतिशिरः पक्षः समाश्रीयतामित्यादिना तत्र श्रुतिशिरांसि उप
निषदस्तदुपकारीणि शारीरकसूत्राणि श्रीमद्भगवद्गीताद्यध्यात्मशास्त्राणि
च तेषां पक्षस्तद्व्याख्यातृभिर्भाष्यकरादिभिः साभिप्रायं पूर्वापरवाक्याविषयप्रदाने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नसमन्वयेनकांडत्रयवेदतात्पर्यनिर्णयोनिर्गुणेऽखंडाद्वितीयेवस्तुनिष्कृतःस
एवपक्षःसमाश्रीयतां।सम्यक्तयाविरोधिमताप्रतिहतत्वेनश्रवणादिप्रकारैराश्र
णीयःवैदिकत्वादिस्यनतुसाख्यनैय्यायिकादिसिद्धांतःकुमतत्वादवैदिक
त्वात्तस्यईक्ष्यतेर्नाशब्दमितिसूत्रानुशिष्टाःपरिग्रहादित्यादिनाच।नचात्मावारे
द्रष्टव्यःश्रोतव्योमंतव्योनिदिध्यासितव्यइत्यादिश्रुतौशब्दयुक्त्यावृत्तीनांज्ञा
नोत्पत्तौतुल्यसाधनत्वेउक्तेसतिकथंतत्वमस्यादौपनिषद्वाक्यमेवैकांतिक
मन्यनिरपेक्षंसाधनमित्युक्तेकिंतुवाक्यश्रवणात्परोक्षतःप्रतिपत्तिःस्यात्तद
परोक्षार्थप्रतिपत्यर्थमुक्तविधिबलाद्युक्त्यावृत्तिरूपंप्रसंख्यानमपेक्ष्यंस्यात्
इतिवाच्यमत्रद्रष्टव्यइत्यनेनफलाभिमुखीकरणेनश्रवणस्यांगित्वाभिमत
त्वेनतदितरयोरंगत्वाभिमतत्वात्॥किंचास्यविधेर्विधित्वमवेनाभ्युपेयतेऽभियुक्तै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्ज्ञानसाध्यस्य मोक्षस्य स्वतः सिद्धस्वरूपत्वेनाक्रियाफलत्वात्॥ ननु मास्तु सिद्धार्थे
विध्यपेक्षा श्रवणादौ तदपेक्षेति चेन्न जिज्ञासोः प्रेरणाया आनर्थ्यात् क्रियोपदेशस्य
चायोगात्। न चानेन द्रष्टव्यः श्रोतव्य इति वाक्यस्यानर्थक्यं स्यादिति वाच्यं। प्रमातुर्ब
हिर्मुखतानिवारणेन विध्याभासत्वेन सार्थत्वात्तस्य। अतश्चित्तस्यास्थ्येन सिद्ध
ब्रह्मात्मसाक्षात्कारावलंबिन्यास्तदज्ञानविरोधिन्याः विद्यावृत्तेः प्रतिपत्तिश्चक्षुः
स्यास्थ्येन घटादिभानवत्स्यात्। अतः कर्तव्य एव युक्तिभिरसंभावनापहारक
पदार्थविवेकस्तत्त्वश्च विपरीतभावनानिवृत्त्यर्थावृत्तिः॥ तथा च श्रुतिस्तस्माद्ब्रा
ह्मणः पांडित्यं निर्विद्य बाल्येन तिष्ठासेत्पांडित्यं च बाल्यं च निर्विद्याथ मुनिरित्य
त्र पांडित्यं श्रवणं बाल्यं मननं मौनिदिध्यासनमिति विज्ञेयं॥ ननु भवतु नामवाक्या
र्थोत्पत्तौ युक्तिभिः पदार्थविवेचनस्यावश्यकत्वमावृत्तीनां चानर्थक्यं स्यादावृत्त्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वश्यकत्वेवाक्यस्यापरोक्षवस्तुन्यपिपरोक्षतयाप्रतिपत्तौसामर्थ्यंस्यान्नतु
साक्षात्करणइतिचेत्सत्यंतथापिनत्वदभिमतंपरोक्ष्यमभ्युपेयंकिंतुपरोक्षाभा
सोपपत्तौस्यादावृत्तेः सार्थत्वंयद्यपिश्रवणप्रकारैर्युक्तितःपदार्थविवेकद्वारा
वाक्यादसंभावनानिवृत्त्यासिद्धवस्त्वपरोक्षसाक्षात्कारउपपद्यतेतथापिपूर्व
मनात्मसंस्कारशेषतःकिंचिदवच्छेदरूपपरोक्षाभासोविपरीतभावलक्षणः
स्यात्तन्निवृत्त्यर्थमहंब्रह्मास्मीतिसजातीयप्रवाहीकरणविजातीयप्रत्ययति
रस्करणलक्षणंनिदिध्यासनंकर्त्तव्यं।तथाचतमेवधीरोविज्ञायप्रज्ञांकुर्वीत
ब्राह्मणइतिश्रुतिः।शब्दादेवापरोक्षधीरितिचानेनवाक्यार्थग्रहणेप्यावृत्तेरा
वश्यकत्वंशब्दस्याप्यपरोक्षकरणसामर्थ्यंदर्शितंभवति।तात्पर्याधीनत्वाच्छ
ब्दवृत्तेर्यथावस्तुतथाज्ञानंस्थिरमतेःकरोत्येवशब्दः।किंचपदार्थविवेकद्वारा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्यां वाक्यार्थसिद्धौक्तेष्वावर्त्तनेन न कश्चिदतिशयः स्यात्॥ किं तु श्लोकपाठवत्
वृत्तिस्थैर्यमेव तस्याच्छ्रवणमनननिदिध्यासनान्यपि पूर्वसाधनवदांतरपुरुष
धीदोषप्रहाणाय भवंति न त्वपरोक्षवस्तुसाधकानि तत्साक्षात्कारस्तु पदार्थवि
वेचनद्वारा वाक्यार्थज्ञानमज्ञातार्थभासत्वात्तस्यातः श्रुततत्वमस्यादिवाक्ये
न जिज्ञासुना वाक्यार्थग्रहणसामर्थ्यायोपनिषत्पक्षमाश्रित्य कर्त्तव्यः श्रवणा
दियोगेन वाक्यार्थविचार इति सिद्धं॥ तत्रादावाचार्याद्वेदांतश्रवणं संन्यस्य श्रव
णं कुर्यादिति शास्त्रात् तच्च षड्विधलिंगैः षड्विधास्तु उपक्रमोपसंहारावभ्यासोऽपू
र्वता फलं अर्थवादोपपत्ती लिंगं तात्पर्यनिर्णय इति॥ तत्रादौ सदेव सौम्येदमग्र आ
सीत्। एकमेवाद्वितीयं ब्रह्मेत्यादिना यत्। निर्विशेषं सजातीयविजातीयस्वगत
भेदशून्यं ब्रह्मेत्यधिकार्यभिमुखीकरणायोक्तं तदेवांते ऐतदात्म्यमिदमित्युपसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हतमित्युपक्रमोपसंहारौ।एवंप्रकरणप्रतिपादितार्थस्योपक्रमोपसंहाराभ्यामे
कार्थावधारणेनलिंगद्वयाभासेप्येकलिंगत्वंसूचितं॥मध्येचपौनःपुन्येनप्रतिपाद
नमभ्यासोयथातत्त्वमसिश्वेतकेतोर्नवक्तृत्वप्रतिपादनमेतस्मिन्पौनरुक्त्यशंका
पनयनेनाद्वितीयेब्रह्मणितात्पर्यदर्शनंतथाचोपक्रमोपसंहाराभ्यांयदद्वितीयं
ब्रह्मोक्तंतस्यप्रमाणांतराविषयीकरणमपूर्वता प्रत्यक्षादिप्रमाणविरहेणतत्त्व
मस्यादिवाक्यमेवात्राविद्यानिवृत्त्यर्थंब्रह्मबोधार्थेप्रमाणमितिविज्ञेयंफलंतु
ब्रह्मवेदब्रह्मैवभवतितरतिशोकमात्मविदाचार्यवान्पुरुषोवेदेत्यादिनाज्ञान
स्यतत्साधनस्यचब्रह्मसाक्षात्कारेणाविद्यानिवृत्तिरेवफलमितिप्रयोजनां
तराभावेनानुध्येयंमुमुक्षुणेतिभावः॥अथार्थवादस्तत्राश्रुतंश्रुतंभवत्यविज्ञा
तंविज्ञातंविज्ञातमित्यादिनाऽद्वितीयवस्तुप्रशंसनंमुमुक्षूपकारायवस्तुत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तु यत्र त्वस्य सर्वमात्मैवाभूत्तत्र किं केन पश्येत्तत्किं केन जिघ्रेदित्यादिना चिदेकरसे ब्रह्मणि कुतः श्रवणादिव्यापार इति॥ तथैवोत्पत्तिस्थितिप्रलयप्रवेशनिर्गमनानी नि लोकसिद्धान्तुवादो ऽर्थवादो ऽध्यारोपापवादाभ्यां निःप्रपंच ब्रह्मप्रपंचनार्थः बद्धमुक्तव्यवस्थायाः प्रतीयमानत्वेन पुरुषार्थप्रतिपादकशास्त्राचार्यप्रसक्ते र्वस्तुतो न निरोधो न चोत्पत्तिर्न बधो न च साधकः न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थतेति स्मृतेः उपपत्तयश्चैकेन लोहमणिना सर्वं लोहमयं विज्ञातं भवत्येकेन मृन्मयेन सर्वं मृन्मयं वाचारंभणं विकारो नामधेयमित्यादिभिः सदृष्टांताभियुक्तिभिरनुचिंतनेन सर्वविरोधिमतनिवारणेनाद्वितीब्रह्मप्रतिपादनं॥ एवमेतैर्लिंगैः सर्वेषां वाक्यानां निर्गुणब्रह्मपरत्वं विज्ञेयं॥ निरूपणप्रसंगतः साधनादौ साध्याभासः स्यात्स चैतेन लिंगार्थबोधनेनानुसंधेयो यः परम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिद्धांत उपक्रमोपसंहारसिद्धः स एवानुसंधेय इति दर्शितं भवति एवं बुभु
त्सोः सर्वकर्मसंन्यासस्य श्रवणार्थत्वात् । श्रवणप्रकारो दर्शितो वाक्यार्थाव
गतौ तथा च त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणां श्रुत्या विधीयते यस्मा
त्त्यागी पतितो भवेदिति ॥ अत्र यन्निंदाश्रवणं तन्न सर्वत्र प्रसज्जेत किंतु ये
केचित्केनाप्यौत्सुक्येन कृतसंन्यासा अपि रागिणः केवलं दंभार्थं वेषमात्र
संपादनेन जीवंति तान् । प्रतितेतु पतंत्येवोभयभ्रष्टत्वेन ये च केचिद्विविदि
षवः संतः श्रुततत्त्वमस्यादिवाक्या अपि केनापि बुद्धिगतदोषप्रतिबंधेन बु
द्धिजाड्येन श्रवणादावप्रवेशादकृतपदपदार्थविवेकास्ते तीव्रेणोपासनायो
गेन क्रमत इहैव प्राप्ताधिकाराः संतो वाक्यार्थावगत्या ब्रह्मलोकावाप्तिद्वारा
ब्रह्मणा सह वा मुच्यंत एव संसारात् ॥ न तत्र निंदायाः प्रसक्तिरिति प्रसंगतो द

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्शितं॥ प्रकृतं तूक्तश्रवणप्रकारेण बुभुत्सुना श्रवणं क्रियतामिति वाक्यार्थश्च
विचार्यतामित्यनेनोक्तं॥ अथ मननप्रकारमाह दुस्तर्कात्सुविरम्यतामिति॥
दुस्तर्को नाम तर्कादिशास्त्रमनुसृत्य साक्षेपतो विसंवाद वितंडादिवादानुत्सा
र्यवैदिकस्तर्को रजस्तमउपजीवनो यस्तस्माद्दुस्तर्कात्सुविरम्यतां॥ सुष्ठुत
या पुरुषार्थप्रतिकूलता बुद्ध्योपरम्यतां॥ न च शुद्धसत्वस्य दुस्तर्काप्रसक्ते
स्तन्निषेधस्य वैयर्थ्यं स्यादिति वाच्यं यावदविद्यानिवृत्ति गुणत्रयस्य
प्रहणात्। फलपर्यवसायि परमार्थानवलंबाद्वा॥ अतो नानुसंधेयो दुस्तर्कः॥
ननु किं दुस्तर्कत्यागमात्रेणैव स्याद्वा वाक्यार्थावबोधेनेत्याह श्रुतिमतस्तर्को
नुसंधीयतामिति श्रुतयस्तावदुपनिषदस्तासामतोऽभिमतस्तर्को युक्तिरनु
संधीयतामनुचिंत्यतामयं भाव वक्ष्यमाणप्रकारेण श्रवणेन प्रमाणगता संभावना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निरसनेनज्ञातोयस्यश्रुतितात्पर्यार्थाभिगमस्तेनमुमुक्षुणाविदितश्रुतिता
त्पर्येणप्रमेयगतासंभावनानिरसनार्थंस्वयुक्तिभिर्व्यवहारसिद्धोपमाभिश्च
श्रुत्यनुसारियुक्तिरनुकालंचिंत्यतांयथाशेषतोऽसंभावनानिवृत्त्यानिरंकु
शवाक्यार्थावबोधःस्यात्तथा॥अथैतस्यचजातायामप्यशेषतोऽसंभावना
निवृत्तौपूर्वसाधनस्यादार्ढ्याद्वाक्यार्थपरोक्षाभासेननिरंकुशवाक्यार्थाव
गमःस्यात्तेनतत्परोक्षाभासलक्षणविपरीतभावनाप्रहाणेनयावन्निरंकु
शब्रह्मस्थितिःस्यात्तावत्सएववस्तुबोधोनिदिध्यासितव्यःसचसजातीय
प्रत्ययप्रवाहीकरणरूपोविजातीयतिरस्करणरूपश्चतत्रादौसजातीयप्र
वाहीकरणमाह॥ब्रह्मास्मीतिविभाव्यतामहरहइति॥अहःअहःअनुदि
नमनवछेदेनाहंदेशकालाद्यनवच्छिन्नब्रह्मैवास्मिनान्यइतिविभाव्यतां॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विशेषेणातीव्रेणायोगेनमाप्युतास्वस्थितयैवस्थीयतामितियावत् । अथैतल्लक्ष
णेनिदिध्यासेभ्यासाद्दार्ढ्याद्विघ्नाश्चायांतीति । अप्रमत्ततयापरिहर्त्तव्या इतिम
मनसिविधायाह ॥ गर्वःपरित्यज्यतामिति ॥ अत्रगर्वशब्देनरसास्वादस्तदुपल
क्षणेनलयविक्षेपकषायग्रहणं चत्वारोविघ्नास्तत्रतावल्लयस्त्रुटितानुसंधा
नेनवृत्तेर्बहिर्मुखतयापरमानंदाद्वितीयस्वरूपानवलंबेननिद्राविर्भावः वि
क्षेपश्चैतैनैवत्रुटितानुसंधानेनस्वरूपानवलंबात् । शब्दादिविषयावलंबः
कषायश्चलयविक्षेपाभावेपिरागादिवासनयाचित्तवृत्तेस्तब्धीभावः सौरेस्वा
दश्चोक्तविघ्नत्रयाभावेपिनिदिध्यासनरूपाहंब्रह्मास्मीतिवृत्त्यावृत्तिजन्यस
विकल्पानंदास्वादः परमानंदाभासः सोपिविघ्नस्थानीयोबहिर्मुखत्वात्तस्य
परमानंदस्यचतत्प्रत्ययसाक्षित्वात् ॥ एवमेतद्विघ्नोपलक्षितोगर्वःपरित्यज्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तोप्रकर्षेणपरिहर्त्तव्य इतियावत्।तत्परिहारप्रक्रिया॥ लयेसंबोधयेच्चित्तंविक्षि
प्तंशमयेत्पुनः सकषायंविजानीयात्समप्राप्तंनचालयेत्॥नास्वादयेद्रसंतत्रनिः
संगः प्रज्ञयाभवेत् इत्यस्यार्थः लयेसंजातेप्राणायामादिनाश्रुतार्थसंभावनया
चित्तंसंबोधयेत्॥पुनःसंयोजयेदद्वितीयेब्रह्मणीत्यर्थः तथैवविक्षिप्तंसत्कृत
विवेकेनविषयाणांतुच्छत्वदर्शनेनपुनःशमयेत्पूर्वाभ्यासेनशमंनयेत् शमेन
सहब्रह्मानुसंधानेप्रयोजयेदित्यर्थः तथैवकषायंप्राप्तंचेत् तत्सकषायंविजा
नीयात्।समंप्राप्तंसत्साक्षिणिसमेब्रह्मणिप्राप्तंतदाकाराकारितंनचालयेन्ना
न्यच्चिंतयेदित्यर्थः॥तथैवाद्वितीयब्रह्मध्यानात्स्फुरितेसत्यः सविशेषानं
दोऽयमेवपरमानंदः सर्वोपरमरूपइतिगर्वप्राप्तंचेत्तदावाक्यार्थावबोधपरा
मर्शनतंसविशेषंरसंपरमानंदाभासंनास्वादयेन्नासौरसोमुख्यइतिविज्ञा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यनिरतिशयाखंडानंदाद्वितीयब्रह्मानंद एवानुसंध्येय इत्यर्थः॥ ननुप्रत्यक्षा
दिप्रमाणसिद्धदेहादिविचित्रभेदेषुसत्सुकथंब्रह्मस्थित्यैवासनंकथंचोक्तवि
घ्नपरिहारःस्यादित्याशंक्याह॥ देहेहंमतिरुज्झ्यतामितितत्रदेह इत्युपलक्षणे
नदेहधनदारगृहसुतादिष्वहंमतिरहमादिप्रत्यय उज्झ्यतांत्यज्यतांनमत्तो
ब्रह्मान्यत्किंचिदस्तीति॥ प्रतीयतेचेत्तन्मममायाविलसितप्रतीतिमात्रंनार्थ
तोजाग्रत्स्वप्नसुषुप्तिष्वन्वयव्यतिरेकाभ्यांनममप्रतीतिंविनाकिंचित्कुत्रचि
दप्यस्तीतिप्रतीतिस्तुनमत्तश्चिद्रूपात्सुषुप्त्यैकसिद्धात्सर्वप्रत्युपसाक्षिणःकिं
चिद्वस्त्वस्तीतिविजातीयंप्रत्ययंतिरस्कृत्याहंब्रह्मास्मीत्यजस्रंविभाव्यतामि
तियावत्॥ तथाच एकोदेवःसर्वभूतेषुगूढःसर्वव्यापीसर्वभूतांतरात्मा॥ कर्मा
ध्यक्षःसर्वभूताधिवासःसाक्षीचेताकेवलोनिर्गुणश्चेतिश्रुतिःभगवतापिमत्तः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परतरंनान्यत्किंचिदस्तिधनंजयेत्यादिनाअन्यत्रापिप्रातीतिकेनरूपेणविकारोऽ
सत्यएवहिकारणाकारेणएवात्रसत्यःसाक्षात्सदासुराइत्यादिश्रूतिस्मृतिप्रति
पादितेनिर्विशेषंब्रह्मनिदिध्यासेत्॥निदिध्यासनप्रकारस्तुदद्यान्नावसरंकिं
चित्कामादीनांमनागपि॥आसुप्तेरामृतेःकालंनयेद्वेदांतचिंतयेति॥एवमेते
नसजातीयप्रत्ययप्रवाहीकरणविजातीयप्रत्ययतिरस्करणरूपंनिदिध्या
सस्यलक्षणंदर्शितंअत्रयेप्राणायामादिनांऽष्टांगयोगमिच्छंतितत्किंचित्प
क्वकषायमुद्दिश्ययेत्वशेषतःपक्वकषायाअखंडाकारकारिलवृत्तयोऽकृत्रिम
समाधयस्तेषांवाक्यात्तत्वावबोधएवसमाधिःवाशिष्ठोपितत्वावबोधएवैकःस
र्वाशात्रृणपावकःप्रोक्तःसमाधिशब्देननतुतूष्णीमवस्थितिरिति॥तत्रैवदृश्यं
नास्तीतिबाधेनमनसोदृश्यमार्जनं॥उत्पन्नंचेत्तदोत्पन्नापरानिर्वाणनिर्वृति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रित्यत्र दृश्यं नास्तीति बोध एवाभ्यसनीय इति दर्शितं भवति प्राणायामादियोगे तु
चित्तस्थैर्यमात्रमुपलक्षितं भवति न तु प्राक्वाक्यार्थावबोधाच्छमादियोगसिद्ध
मस्त्येवाधिकारिणि। अत्र तु वाक्यार्थावबोध एवाभ्यसनीयस्तथा चापरोक्षानुभू
तावाचार्यैरपि। सर्वं ब्रह्मेति विज्ञानादिंद्रियग्रामसंयमः॥ यमोऽयमिति संप्रोक्तोऽ
भ्यसनीयो मुहुर्मुहुः॥ सजातीयप्रवाहश्च विजातीयतिरस्कृतिः॥ नियमो हि प
रानंदो नियमात्क्रियते बुधैः॥ त्यागः प्रपंचरूपस्य चिदात्मत्वावलोकनात्॥ त्या
गो हि महतां पूज्यः सद्यो मोक्षमयो यतः॥ यस्माद्वाचो निवर्त्तंते अप्राप्य मनसा
सह॥ यन्मौनं योगिभिर्गम्यं तद्भजेत्सर्वदा बुधः॥ वाचो यस्मान्निवर्त्तंते तद्वक्तुं के
न शक्यते॥ प्रपंचो यदि वक्तव्यः सोपि शब्दविवर्जितः॥ इति तावद्भवेन्मौनं सतां
सहजसंज्ञितं॥ गिरां मौनं तु बालानां प्रयुक्तं ब्रह्मवादिभिरित्यादिना। एभिरंगैः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंच॰ रत्न॰

२९

समायुक्तो राजयोग उदाहृतः॥ किंचित्पक्वकषायाणां हठयोगेन संयुतः॥ परि
पक्वमनोयेषां केवलोयं च सिद्धिदः॥ गुरुदैवतभक्तानां सर्वेषां सुलभोजवादित्यंते
नासनध्यानधारणादिसमाध्यंगानि निर्विशेषब्रह्मात्मैक्यावगताबुत्प्रेक्षितानि सं
तितस्मादुक्तसाधनसंपन्नैस्त्यक्तैषणैर्भगद्गुरुशरणैः श्रवणाद्योगारूढैर्निरस्ता ७४
संभावनैर्यावद्विपरीतभावनिवृत्तिः उक्तप्रकारब्रह्मावबोध एवाभ्यसनीय इति
सिद्धं। न चात्र निवृत्ताशेषासंभावनाय मुमुक्षवे देहेहं मतिरुज्झ्यतामिति निषेधो
पदेशो न युक्तस्त्वप्रसक्तत्वादस्य किंतु ब्रह्मास्मीति विभाव्यतामित्येवास्त्विति वा
च्यं॥ विपरीतभावनानिवृत्त्यर्थत्वाद्ब्रह्मास्मीतिप्रवाहस्य तस्मात्सजातीयं प्रत्य
यं पुरस्कृत्य विजातीयतिरस्करणमेव निदिध्यासनलक्षणं विपरीतभावनानि
षेधनार्थत्वादतो युक्तमेवोक्तं॥ अथात्र कदाचिच्छास्त्राभिनिवेशस्वभावेन व्यवहा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रमनुसरत्ययेनकेनचित्। विवादप्रवृत्तिर्जाताचेत्। सोपिमहाननुविघ्नइत्यनुसंधा
याह॥ बुधजनैर्वादःसमुत्सृज्यतामिति॥ बुधजनैर्विचिकिभिर्वादोवितंडादिः॥ समु
त्सृज्यतां॥ सम्यक्समदृष्ट्योत्सृज्यतांत्यज्यतामत्रबुधजनैरितित्र्यनेनविशेषे
ण। विचिकिभिरप्रसक्तिर्दर्शितेतिविज्ञेयंनकेनचिदपिवादःकर्त्तव्यइतितात्पर्यं
चित्तविक्षेपस्यतुल्यत्वात्। एवमेतस्मिन्नृतीयेरत्नेवाक्यार्थग्रहणसामर्थ्यसंपा
दनेनपदार्थविवेकांगतःश्रवणमनननिदिध्यासनानिदर्शितानि। तत्रसंगतः
प्रतिपाद्यप्रतिपादकत्वेनब्रह्मात्मैकत्ववेदांतशास्त्रयोःसंबंधोविज्ञेयो। विषयो
ब्रह्मैवप्रयोजनमपिब्रह्मैवाविद्यानिवृत्त्येतिविज्ञेयंतत्रश्रुतिशिरःपक्षःसमाश्री
यतामित्यनेनसंबंधः। ब्रह्मैवास्मीतिविभाव्यतामित्यनेनविषयः॥ देहेहंमति
रुत्सृज्यतामित्यनेनाविद्यानिवृत्तिलक्षणप्रयोजनमित्यनुबंधत्रयमधिकारीतु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रथमतः श्लोकद्वयेन निरूपित इति तृतीयरत्नं समाप्तं ॥३॥ ॥ ॥ ॥
॥ ननु लयादिविघ्नायेप्रोक्ता बुधजनैर्वादश्चयः प्रोक्तः एतेषां निवृत्तौ न प्रयासः स्या
त् अधिकारबलात् ॥ तत्परिहारेण स्वरूपानुसंधानं करिष्यत्येव मुमुक्षुस्तथा
प्यशनादीनि देहनिर्वाहकाणि विक्षेपकराण्यपरिहार्याणि संति तत्सत्त्वे स्याद
खंडाकाराकारितायावृत्तेः स्खलनमित्याशंक्याह ॥ ॥ ॥ ॥

॥ क्षुद्व्याधिश्च चिकित्स्यतां प्रतिदिनं भिक्षौषधं भुज्यतां स्वाद्वन्नं न तु य
॥ चतां विधिवशात्प्राप्तेन संतुष्यतां ॥ शीतोष्णादि विषह्यतां न च वृथा
॥ वाक्यं समुच्चार्यतामौदासीन्यमभीप्स्यतां जनकृपानैष्ठुर्यमुत्सृज्य
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ तां ॥४॥

॥ क्षुद्व्याधिश्च चिकित्स्यतामिति ॥ क्षुधेव व्याधिः स चिकित्स्यतामिति ॥ तस्य व्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धेश्चिकित्सा क्रियतामौषधप्रयोगः कर्त्तव्य इत्यर्थः ॥ किमौषधमित्यत आह ॥ भि
क्षौषधं भुज्यतामिति ॥ भिक्षौषधमित्यनेन भिक्षोपार्जितं यद्द्रव्यं तदेवौषधं भुज्यतां
मिति ॥ भिक्षौषधे न त्वन्यव्यापारार्जितमिति भावः । अन्यव्यापारे गतायां वृत्तेर्न पुनः
प्रत्यक्प्रवणमनसामर्थ्यं स्यात् । पराक्संस्कारस्याधानात् ॥ किंचात्र क्षुधायां व्या
ध्युत्प्रेक्षया यथाऽननुसंधानेन संजाते व्याधौ तदुपशमनार्थमेवौषधप्रयोगः
क्रियते जनैर्न त्वौषधलालसया तद्वत्क्षुधोपशमनमात्रे तात्पर्यं न त्वन्नादौ रसा
भिसंधानमिति दर्शितं भवति ॥ किंच भिक्षौषधं भुज्यतामित्यनेन क्षुधोपशमनार्थं
तावन्मात्र आयास आदरोऽपि सूचितो नो चेन्नाभ्याससिद्धिः स्यादिति तथा
च भगवता नात्यश्नतस्तु योगोऽस्तीत्यादिनोक्तं । अत्र चानुक्तमप्याच्छादनं कमश
मंच ग्राह्यं देहनिर्वाहकत्वस्य तुल्यत्वात् तदपि शीतादिव्याध्युपशमनार्थमौष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थवन्न तु तद्रसेनेति ॥ तदेवाह अस्वादु अन्नेन न तु यत्स्यतामिति ॥ स्वादु अन्नं मिष्टम
न्नं केवलं रसनोपजीवनं स्निग्ध हृद्यादिगुणकं यत्तस्मिन्न तु यत्स्यतां न यत्नः
क्रियतां तु निश्चयार्थः न कदापि तदनुसंधेयमिति तदनुसंधाने न कदापि को
पि नत्त्वस्त्रोपशमं यास्यतीति भावः तस्माद्भक्षाभ्यासपरेण मुमुक्षुणा क्षुधादि
लक्षणविघ्नपरिमार्जनसाधनरूपं नैक्ष्यं ग्राह्यं न तु रसनाविषयं कुर्वीदिति ॥
अथ भिक्षामात्रमायासे पि लाभालाभयोर्हर्षविषादवृत्तिरपि विघ्नस्थानीया
सापि निवार्येत्याह ॥ विधिवशात्प्राप्तेन संतुष्यतामिति विधिवशात् दैववशात्
प्राप्तेनैकेन संतुष्यतामल्पमिलितस्वयत्नाद्भिक्षादेरुपरम्यतामिति यावत्
न तु यावत्परिमाणमन्नमाच्छादनादिकं वा न प्राप्तं विधिवशादमत्त्या प्राप्तं वा न
दास्यादेव विक्षेप इत्याशंक्याह ॥ शीतोष्णादि विषह्यतामिति ॥ शीतोष्णसुखदुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खमानापमानादिनिर्द्वंद्वानिदैववशादागतानिचलानिविषह्यंतां।विशेषेणाविवे
केनसताक्षम्यतां।नचतितिक्षावत्यधिकारिणि।पुनर्द्वंद्वसहनोपदेशस्यवैय्य
र्थ्यंस्यादितिवाच्यंयावन्निदिध्याससिद्धिर्द्वंद्ववशात्प्रमादतःस्यात्तुद्वंद्वागम
प्रसक्तिरतोनतत्सहनोपदेशस्यवैय्यर्थ्यंस्मारकत्वेनसार्थत्वमेवतस्मादप्र
मत्तेनसतासोढव्यानिशीतोष्णादीनीति॥अतएवतत्स्वीकारेयत्नंनिवारय
ति॥नचवृथावाक्यंसमुच्चार्यतामितिवाक्यंकिंमयाकार्यंकथंवाममशीतोष्णा
दीन्यभिभवंतीतिसतिदैवाधीनेनचवृथोच्चार्यतांचकारेण।चिंतनमपिनिवा
रितंभवतिविक्षेपकरत्वस्याविशेषादुभययोः॥समुच्चार्यतामित्यत्रसम्यक्
पदेनसम्यक्तत्वदृष्ट्यावाक्यचिंतनयोर्निषेधोदर्शितइतिविज्ञेयं॥यद्वाभग
वच्चरणेनोक्तलक्षणनिदिध्यासनरूपंभगवद्योगंयुंजतायोगिनाप्रसंगप्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्तं विनोपनिषदावर्त्तनं भगवद्गुणश्रवणं वाऽध्यात्मशास्त्रानुचिंतनं वा नरथाव
क्यं विना प्रयोजनमुच्चार्यतां न च किंचिच्चिंत्यतां वा किंत्वौदासीन्यमभीक्ष्यतामि
ति॥ अभिपरित्तः सर्वत्रेत्यर्थः औदासीन्यमुदासीनभाव ईश्वरप्रेरितप्रारब्धवशा
त्॥ मम शरीरस्थितिर्भवतु न वा मम चासंगोदासीनस्याखंडाद्वितीयस्य ब्रह्मा
त्मनः किमप्राप्तं प्राप्यं वेत्यनुसंधाय मुखेनाखंडाकाराकारितया वृत्त्या स्थीय
तां ममेत्यभीक्ष्यतां सततमनुसंधीयतामिति यावत् तदेवाह॥ जन कृपा नैष्ठुर्य
मुत्सृज्यतामिति॥ जनेषु स्वशुश्रूषणपरेष्वन्नादिदातृषु कृपां तदितरेषु नैष्ठुर्य
म कृपां चोत्सृज्य नामुत्कृत्य मूलेन देहाद्यभिमानेन सहोत्सृज्यतां त्यज्यतां म
माखंडाद्वितीयस्य ब्रह्मणः कः कृपाविषयः को वा नैष्ठुर्यविषय इत्यभिसंधाय
न कुत्रचित् कृपया नैष्ठुर्येण वान्येन वा केनापि कारणेन प्रसज्यतामिति यावत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवमेतस्मिन्नूचतुर्थरत्ने कृतवाक्यार्थग्रहणसामर्थ्योपायपदपदार्थविवेकस्य
श्रवणं गतया विहिते विपरीतभावनानिरसनार्थं निदिध्यासने चित्तस्थिरीकर
णस्य यामि प्रकारो दर्शितः॥ अथ तत्सामर्थ्यसंपन्नस्य भगवदेकशरणस्य यो
गिनो वाक्यार्थविषयकसाक्षात्कारलक्षणकथनेन तत्फलकथनेन च जीवन्मु
क्त्यनुविदेहकैवल्यांतप्रकरणसमाप्त्या पंचमं रत्नमारभ्यते॥ छ॥ छ॥ छ॥ छ

॥एकांते सुखमास्यतां परतरे चेतः समाधीयतां पूर्णात्मा सुस
॥मीक्ष्यतां जगदिदं तद्बाधितं दृश्यतां॥ प्राक्कर्म प्रविलाप्यतां चि
॥तिबलान्नाप्युत्तरैः श्लिष्यतां प्रारब्धं त्विह भुज्यतामथ परं ब्रह्मा
॥त्मना स्थीयतां॥ ५॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

तत्र तावत्पूर्वश्लोके यः कथितो निदिध्यासनप्रकारस्तस्यैवद्वैंऽगे दर्शयति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकांतइतिएकांतेयत्रकुत्रचिदतिप्रसंगविवर्जितदेशेसुखंसुखेनवशीकृतेंद्रि
ययाममखिन्नीकृत्याप्रमत्तमनसासंत्यक्तनिकेतनासक्तिःसन्न्यास्यतांस्थीय
तां॥प्रारब्धवशाद्यत्रतत्रविजनसंभावनयाकेवलयैकांतिकतयावाब्रह्मास्मी
तिवृत्त्यास्यतामितियावत्॥ननुकिमेकांतदेशस्थित्यैवस्यान्निदिध्यासनसि
द्धिरितिचेन्नकिंतुपरतरेचेतःसमाधीयतामिति।तत्रपरतरंसर्वस्मादस्मादध्य
स्तात्प्रत्यक्पराक्त्वेनस्थूलसूक्ष्मत्वेनास्मद्युष्मत्प्रत्ययगोचरत्वेनप्रतीयमा
नाद्यत्परमव्याकृताख्यंशबलंब्रह्मास्यनामरूपात्मकस्यजगतःप्रभवस्थिति
लयस्थानंततःपरंपरतरंयद्बोधैकरससत्तामात्रमखंडानंदाद्वितीयंदेशका
लाद्यनवच्छिन्नंनित्यानुभवरूपंब्रह्मस्वरूपंतथाचश्रुतिःइंद्रियेभ्यःपराह्य
र्थाअर्थेभ्यश्चपरंमनः॥मनसस्तुपराबुद्धिर्बुद्धेरात्मामहान्परः॥महतःपरम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यक्तमव्यक्तात्पुरुषः परः पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति॥ अ
त्रार्थानामिंद्रियेभ्यः परत्वमर्थार्थत्वादिंद्रियाणां। यैर्निमित्तभूतैर्येषामुत्पत्तिस्ते
भ्यस्तेषां परत्वमिति न्यायात्। महानात्मेति हिरण्यगर्भः सूत्रात्मा कंशादिजग
त्सम्भवाव्याकृतावस्थाविशेषस्ततः परमव्यक्तमव्याकृतमन्यत्स्पष्टं। तस्मा
द्यस्मान्न परमस्ति यच्च पूर्णत्वात्परमपुरुषार्थस्वरूपत्वात्पुरुषाख्यं वस्तु तत्सु
रतरे तस्मिन्नु चेतश्चित्तं। समाधीयते। सम्यक्कृतगुरुशास्त्रप्रसादजविद्य
या विजातीयतिरस्कारेणाधीयते। विरम्यते। न तु विजातीयानात्मवस्तु कच
लितं तस्य विक्षेपस्वरूपत्वात् तथा च गीतासु॥ तं विद्याद्दुःखसंयोगवियोगं यो
गसंज्ञितं॥ स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसेति। अत्र दुःखसंयोगवि
योगो नाम विजातीयप्रत्ययतिरस्कार इति विज्ञेयं स चासंभावनापरिहारेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लं

ज्ञातो यो ब्रह्मात्मैक्यानुभवस्तेनेति ॥ न च योगसंप्रदायेन चित्तनिरोधेन स्याद्विजा
तीयप्रत्ययतिरस्कारः किं ब्रह्मात्मैक्यानुभवेनेति वाच्यमिह विजातीयानात्मसंबं
धस्य ब्रह्मात्मैक्यानवत्तौ बसिद्धत्वात् तस्मात्संजातायामप्यसंभावनानिरस्ताव
निवृत्ताशेषसंस्कारदोषनिमित्तब्रह्मपारोक्ष्याभासनिवृत्त्यर्थं ब्रह्मात्माखंडभा
वएवाभ्यसनीय इति तथा च श्रुतिः विज्ञाय धीरो प्रज्ञां कुर्वीत ब्राह्मण इति एवं ब्र
ह्मास्मीति विभाव्यताभित्यारभ्य परतरे चेतः समाधीयताभित्यंतेन निदिध्या
सनस्य लक्षणं दर्शितमथैतत्सिद्धसाक्षात्कारमाह पूर्णात्मा सुसमीक्ष्यताभि
ति पूर्णश्चासावात्मा च पूर्णात्मा । तत्र पूर्णं देशकालाद्यनवछिन्नं नित्यनिरस्ता
विद्यं यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमेत्यादिश्रुतिप्र
तिपादितं यद्भूमाख्यैकरसं ब्रह्म तदहमात्मा नान्य इति । सुसमीक्ष्यतां सुष्टुत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

याशमादिनासहसंपादितश्रवणादिनागुरुशास्त्रजापदत्तामतयाविद्ययास
मीक्ष्यतांसम्यक्प्रकारेणविगतविपरीतभावनयासाक्षात्क्रियतांनचविद्यया
साक्षात्कृतेसतिनाखंडाद्द्वितीयब्रह्मापरोक्षसाक्षात्कारःसिध्यतिकिंतुस
द्वितीयशबलब्रह्मसाक्षात्कारएववृत्तेःसत्वादितिवाच्यंवृत्तेःस्वमर्यादयासिद्धत्वा
त्ननुविषयमर्यादयाविषयस्यापरिछिन्नस्वभावत्वात्॥तस्मात्गुरुशास्त्रज
वृत्तिःस्वव्याप्यत्वेनाद्वितीयंब्रह्मैवसाक्षात्करोतिननुशबलंसोपाधिकंशुद्धे
चसाक्षात्कृतेसतितन्महिम्नास्वस्यसत्वमपिनिवारयति।नचब्रह्मणिवृत्तिव्या
पकत्वमात्रेणफलव्याप्तिंविनानपुरुषार्थःसिध्यतिघटादावदर्शनादितिवा
च्यं॥ब्रह्मघटयोर्विशेषस्याभिगमात्तत्रब्रह्मात्मवस्तुतुसदाप्रत्यक्त्वेनस्व
तःसिद्धंस्वसत्ताकंस्वप्रकाशस्वरूपमन्यनिरपेक्षंस्याध्यस्तपरप्रकाशकंप्रमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्प्रमाणानभिगम्यमपरिछिन्नं स्वतः पुरुषार्थस्वरूपं सर्वाभिन्नं च घटादि प्रमे
यं तु तद्विपरीतमतस्तत्र तस्य प्रमातृप्रमाणाधीनत्वेनास्तु फलव्याप्तिद्वारेव पुरुषा
र्थसिद्धिर्न तथा ब्रह्मात्मनि॥ उक्तविशेषस्याभिगमात्॥ न चैवं तर्हि न वृत्तिव्याप्य
त्वमपि सिध्यति सर्वप्रमाणाविषयत्वस्योपपादितत्वात् ब्रह्मणः वेदांतानां चानर्थ्यं
स्यादिति वाच्यमनाद्यविद्याविषयत्वेन प्रमाणांतरनिरपेक्षवेदांतविषयत्वस्या
भ्युपेयत्वात् ब्रह्मणस्तथा हि ब्रह्म स्वमहिम्नैव स्वत्वाभावास्फुरणेन नित्यस्वोल्ले
खेन नित्यावाप्तपुरुषार्थमप्यनादिसाभासस्यानुभवगम्यव्यवहाराभिमताऽवि
द्यानुग्राहकत्वेन स्वाज्ञानत्वसिद्धोऽस्य कल्पितवेदांतविद्यावृत्तिद्योतकत्वेन तद्वृ
त्तिद्वारेव तां वृत्तिमनुगृह्य वृत्तिव्याप्यत्वमप्याभासयति॥ ननु तत्त्वकाश्या वृत्ति
स्तं विषयीकरोति॥ एवं च वेदांतशास्त्रमपि पुरुषव्यापारसहितं साभासां वृत्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुत्पाद्यतद्वृत्तिफलितस्वाख्याभासद्वारा साक्षिणं विषयीकृत्याज्ञातार्थज्ञापकं सत्
स्वतः सिद्धपुरुषार्थाभिव्यंजकं भवत्यनेन च ब्रह्मणो वृत्तिविषयत्वा सिद्धावपि फ
लव्याप्त्यानर्थी सिध्यति सर्वप्रत्ययसाक्षित्वाद्विषयस्य वृत्तिव्याप्तेरपि लाक्षिण
कत्वं संगच्छते॥ अतः प्रमाणाविषयेऽपरिच्छिन्नेपि ब्रह्मणि तन्माहिम्नैव मुमुक्षुस्वं
संपादनेन तस्य काश्यपगुरुशास्त्रजया तदाकाराकारितया रव्योक्तरीत्या मुमु
क्षोः पूर्णात्मत्वैकलक्षणं प्रतिपद्यत एव॥ एवं साक्षात्कारस्य लक्षणं दर्शितं॥ अथ
प्रतीयमानेनाकारेण जगति कथं पूर्णात्मप्रतीतिः स्यात्। कथं वा पुरुषार्थसिद्धिः स्या
द्विदसत्वस्य दुःखहेतुत्वादित्याशंकां परिहरन्॥ फलमाह॥ जगदिदं तद्बाधितं द
श्यतामिति॥ इदं प्रत्यक्षादिप्रमाणाभासगोचरमाब्रह्मस्तंबांतं नामरूपात्मकं
जगत् तद्बाधितं। तत्पदलक्ष्यं यत्सच्चिदानंदस्वरूपमनामरूपं वस्तु तेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुक्त्यादिना स्वाधिरोपितरजतादिवत् बाधितमितिदृश्यतां तत्साक्षात्कारेण न तत्र का-
लत्रयेपि तदन्यत्किंचिदस्तीत्यनुभूयतामिति यावत् न चैवं तदुक्तं युक्तं भवत्यस्मद्यु-
ष्मत्प्रत्ययगोचरत्वेनोभयोरात्मजगतोः पृथक्त्वेनानुभूयमानत्वादिति वाच्यमुभ-
यानुभवयोः प्रातिभासिकत्वात्। अतो नित्यानुभवरूपे सच्चिदात्मनि सर्वप्रत्यय-
साक्षिणि सर्वाधिष्ठान इदमस्मद्युष्मत्प्रत्ययगोचरं सकारणं सर्वं जगदध्यारोपि-
तं ननु समसत्ताकमतश्च गुरुशास्त्रजविद्यावृत्त्याऽधिष्ठानावलंबिन्या बाध्यत
एव सर्वमनात्मभूतं जगत् अनिर्वचनीयत्वादेतस्य। तथा चान्यत्र। नित्यबोधपरिपी-
डितं जगत्। विभ्रमं नुदति वाक्यजा मतिः वासुदेवनिहतं धनंजयो हंति कौरवकु-
लं यथा पुनरिति ननु सकारणस्य जगतोऽध्यारोपितत्वे योऽध्यारोपः स चैतन्यसि-
द्धिः कारणांतरसिद्धो वा आद्ये चैतन्यस्य विकारित्वं स्यात्। द्वितीये चानवस्था

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यादिति चेन्नायं दोषः कारणस्याज्ञानस्यानाद्यनिर्वचनीयत्वेन चैतन्यमर्यादया
सिद्धत्वात् जगतश्चाज्ञानमर्यादयैवाज्ञानद्वारा चैतन्यसिद्धत्वात् । अत्राज्ञानस्या
निर्वचनीयत्वेन चैतन्यस्य विकारित्वं निराकृतमिति विज्ञेयमनादित्वेन च कारणां
तरमपि । किंचाज्ञानस्यानिर्वचनीयत्वेन जगतः सर्वदैव चैतन्यबाधितत्वमभ्युपे
यते ऽनादित्वेन च व्यवहारसिद्धिरपि । अतः साज्ञानस्य जगतो व्यावहारिकसत्ता
कत्वाच्चैतन्यानन्यत्वसंपादनेन तन्मर्यादयैव चैतन्याधीनत्वेन तस्य सत्त्वसिद्धे
न चैतन्यस्य विकारित्वं कारणांतरापेक्षा वेति सिद्धं । ननु साक्षिवेद्यत्वेन वेदांतशा
स्त्रप्रसिद्धस्य मामहं न जानामीत्यनुभवात्साक्षिप्रत्ययसिद्धचैतन्याश्रयविषय
स्य चाज्ञानस्य कथमनिर्वचनीयत्वमुच्यत इति चेन्नायं दोषः साक्षिवेद्यत्वेनैव त
स्यानिर्वचनीयत्वसिद्धत्वात् तत्र साक्षीत्यभिधानेन चैतन्यसद्भावसंपादनमात्रप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रेणसाक्षिणोऽपरिच्छिन्नतयातन्मर्यादयाऽज्ञानासत्वमभ्युपेयंतद्वयत्वाभिधाने
नचैतन्यस्यनिर्विशेषत्वात्ज्ञातृत्वधर्मरहितस्यव्यवहारसिद्ध्यर्थमज्ञानद्वारैवा
ज्ञानप्रकाशकत्वादज्ञानसत्वंचाभ्युपेयंएवंचसत्वासत्वाभ्यांसिद्धमनिर्वचनीयत्वे
शास्त्रतात्पर्यात्मामहंनजानामीत्यनुभवादप्यज्ञानस्यानिर्वचनीयत्वमेवसं
गच्छते॥तस्यपराकृत्वेनात्मप्रकाश्यत्वेनचप्रत्यगात्मविषयकत्वासंभवेनै
वतादृशेनप्रतीयमानत्वात्॥ननुनोक्तलक्षणस्याज्ञानस्यप्रत्यगात्माविष
यकत्वंकिंतुप्रत्यगात्मविषयकत्वमेवसंगच्छतेविशेषतोऽपरिज्ञानात्प्रत्य
गात्मनइतिचेन्नायंदोषोनिर्विशेषस्वरूपत्वात्प्रत्यगात्मनः नचाहंसुखीदुः
खीकर्त्तानोक्तेत्याद्यनुभवात्प्रत्यगात्मनोननिर्विशेषत्वंसंगच्छतइतिवाच्यं॥
सुखादिप्रत्ययानामप्यनिर्वचनीयाज्ञानाधीनत्वात्।प्रत्यगात्मनश्चज्ञप्तिमात्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वरूपत्वात्सर्वप्रत्ययसाक्षित्वात्प्रत्ययानां च तदनन्यसिद्धत्वान्न कश्चिद्धर्मसंबं
धः संगच्छते। न च न प्रत्यगात्मनो ज्ञप्तिमात्रस्वरूपत्वं येन सर्वधर्मासंगत्वं स्यात् किंतु
ज्ञानादिगुणाश्रयत्वमिति वाच्यं॥ ज्ञानान्यस्य ज्ञानाश्रयत्वस्याघटनात्। जड
त्वात्तस्य न जडमजडस्य जडस्य वाश्रयं भवितुमर्हति तस्मात्सर्वाश्रयस्यात्मनो
न ज्ञानान्यसिद्धत्वं किंतु ज्ञानस्वरूपत्वमेव सर्वप्रत्ययसाक्षित्वात् सुषुप्त्यादाव
पि तस्य साक्षित्वस्यानपलापात्। अतश्च न सर्वप्रत्ययसाक्षिणः प्रत्यगात्मनः
कस्यचिद्विषयत्वं सिध्यति येन तस्याज्ञानं सिध्यति धर्मित्वं वाज्ञानस्य निर्विशेष
स्वभावत्वात् प्रतीयमानस्याज्ञानस्य त्वनादितः प्रत्यगात्मविषयत्वाभासोपि प्र
त्यगात्मानन्यार्थत्वेन तन्मर्यादयैव तस्य वस्तुत्वाभासोस्ति। अतोज्ञानकालेपि
नाज्ञानं नाम किंचिन्निरूप्यं वस्तु वस्त्वस्तीति सिद्धं। न च ज्ञानसाक्षिचैतन्यं यदुच्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेतत्किं शुद्धं प्रमात्रभिधं वाद्यसाक्षिसाक्ष्यभेदसंपादनेनविकारित्वं स्याच्छुद्धस्य
प्रमात्रभिधं चेत्सुषुप्त्यादौ प्रमात्रयोगान्नतस्य साक्षित्वमभ्युपेयमितिचेन्नायंदो
षः शुद्धस्यैवाज्ञानोपहितस्य तत्सत्तामात्रेण सर्वसाक्षित्वादिव्यवहारस्य संभवात्
। अनेनज्ञानस्याप्यनिर्वचनीयत्वमभ्युपेयं । ननु तथाप्यज्ञानस्य साभासत्वस्या
भ्युपगमात्कथमनिर्वचनीयत्वमुच्यते । किंतु मुखाभासाश्रयादर्शादिवत् वस्तु
त्वमेवेति चेन्न चैतन्यमुखयोरपरिछिन्नत्वपरिछिन्नत्वाभ्यां विशेषात् तदु
भयाभासयोरपि विशेषत्वात् मुखदर्पणादिन्नेदेन मुखाभासपदसार्थतासंपा
दनेन मुखतदाभासयोः प्रत्यक्षतः प्रतीयत एव भेदः अत्र तु सत्यपि चिदाभासा
भिधाने चैतन्यस्य चैतन्यमर्यादया नाभासः सिध्यति न च तदाश्रयमज्ञानं वार्कि
त्वाभासमर्यादयैवाभासस्तदाश्रयमज्ञानं च तन्मर्यादया । अतोध्यारोपानुवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दप्रसंगतोव्यावहारसिद्धावाभासग्रहणेपिनमुख्यतदाभासविशेषःप्रतीयते
किंचात्राभासपदंचैतन्यस्याविकारित्वादिप्रतिपत्त्यर्थंनतुस्वार्थद्योतकंतदाश्रय
भूतमज्ञानपदमपितस्मात्सर्वंचैतन्येतरत्तुवाचारंभणंविकारोनामधेयंमृत्तिके
त्येवसत्यमितिश्रुतश्चानिर्वचनीयाभिधमपिनकिंचिद्वस्त्वस्तिचैतन्येतरत्तुकिंतु
सकारणस्यसर्वस्यचैतन्यविलसितत्वात्सर्वंचैतन्यमेवतथाचश्रुतिःतमेवभा
न्तमनुभातिसर्वंतस्यभासासर्वमिदंविभातीति।वाशिष्ठेपिज्ञानेनभवतोभिन्नं
ज्ञानात्तुज्ञेयंपृथक्नहि॥अतोनत्वितरत्किंचित्तस्माद्भेदोनविद्यतइति।तस्मा
च्चिदन्यस्यसर्वस्यचिदज्ञानमात्रत्वाच्चिदज्ञानस्यचिन्मर्यादयाऽसिद्धत्वान्न
किंचिच्चिन्मात्रान्यदस्तीतिजगदिदंतद्बाधितंदृश्यत्वादित्यस्यलक्षणंदर्शितं।
ननुभास्कयद्यपिपरमार्थतःचैतन्यादन्यत्किमपितथापीहाविद्ययाबंधमोक्ष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्यवस्थायां प्रतीयमानायां सत्यामविद्यानिवृत्त्यनंतरमपि पुनरुद्भवद्वारा स्यादनि
र्मोक्षप्रसंग अविद्याया निवृत्तेरभिप्रेतत्वात्तस्याः वस्तुत्वसंपादनात् यन्निवृत्तिम
द्वस्तु तदुत्पत्तिमदपीति न्यायात् इति चेन्नायं दोषोत्र वेदांतसमये सांताया अप्यवि
द्याया अनादित्वस्याभिप्रेतत्वात्। तदनादित्वं च तस्या अनिरूपितरूपत्वादवस्तु
त्वाभिप्रायेण न तु वस्तुत्वाभिप्रायेण। वस्तुत्वे तदाश्रयविषयभूतस्य ब्रह्मपदार्थ
स्यैवैय्यर्थ्यं स्यात्। अविद्यापदार्थस्यापि तस्मात् व्यवहारतोऽनाद्यविद्या नामस
दसद्विलक्षणवाचारंभणमात्रचैतन्यार्थः पदार्थोऽभ्युपेयो न तु स्वार्थद्योतको र
ज्जुभुजंगादिवत्। एवं च यद्यपि सत्तास्फूर्तिमात्रब्रह्मणि तन्मर्यादयो खरदेश
मृगतृष्णिकोदकलेशवत् बंधात्मकसंसारगंधोपि नास्ति तथापि व्यावहारि
कसत्ताकस्वरूपतःसिद्धब्रह्माश्रयविषयानाद्यनिर्वचनीयाविद्याद्वारकोऽसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सारिण्येव संसारित्वाभासस्तन्मूलकानेकबुद्धिविलसितानेकजीवत्वसिद्धानेक
संसारसिद्धिः प्रतीयते। स्वप्नावस्थायामिव तत्रैकस्योक्तसाधनसंपन्नस्योक्ताधि
कारप्राप्तौ सत्यां स्वकल्पितगुरुशास्त्रप्रसादान्निर्विशेषात्मस्फूर्त्याऽनाद्यविद्यास
त्वप्रतिपत्त्या संसारासत्वप्रतिपत्त्या च न पुनः संसारः स्यात्तन्निवृत्तेरप्यसत्वापा
दानात्। अतो नानिर्मोक्षो नित्यमुक्तत्वाद्ब्रह्मात्मनो जीवभेदस्य चापार्थस्फु
रणात्॥ अत्रैकजीवकल्पितानेकजीवत्वसिद्धेर्नैकजीवानेकजीवपक्षयोर्विरो
धोऽभ्युपेय उभयपक्षानुवादस्य बुभुत्सुप्रबोधने साधनत्वात् प्रमाणजन्यव्यु
त्पत्तौ त्वेकोऽपि पक्षो नाभ्युपेयते तज्ज्ञानिनाविद्यानिवृत्तेरानर्थ्यप्रसंगात्। न च स
देव सौम्येदमग्र आसीदित्याद्यया श्रुत्या सृष्टेः प्राक् ब्रह्मणो निर्विशेषत्वनिरू
पणेन शुद्धत्वमुक्तं पुनरात्मन आकाशः संभूत इत्यादिश्रुत्यंतरेण जगदुत्पत्ति

रपि दर्शितानेन शुद्धात्सृष्टेरुत्पत्तौ शुद्धस्य विकारित्वप्रसंगतः स्यादनिर्मोक्षश्च इति
वाच्यं। सृष्ट्यादिप्रवाहाभिप्रायेण व्यवहारतः सर्वोपरमावधित्वेन सदित्यनेन शबल
त्वस्य ग्रहणात् इदंकारास्पदस्याकाशादिप्रपंचस्य कारणाकारेण सत्त्वाभिगमा
त्। सुषुप्त्यवस्थायामिवातो न शुद्धात्कस्यचिदुत्पत्तिरभ्युपेया किंतु तस्यैव नित्यो
पलब्धिस्वरूपत्वेनाचिंत्यप्रभावतः प्रतीयमाने व्यवहारेऽविकारतयैवानादित
उपाध्युपहितत्वग्रहणेन तदेव सकारणसृष्टिस्थितिप्रलयात्मकत्वेन जगदु
पेण विलसति न तद्भिन्नं जगन्नाम किंचिद्वस्त्वस्ति अतोपि न ततः कस्याश्चिदु
त्पत्तिरिष्यते दृश्यते तदनादिजीवादृष्टतो जगतः प्रवाहो न त्वसतो जगतउत्प
त्तिः पूर्वमकल्पयद्धातेत्यादिश्रुतेर्भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयत इत्या
दिस्मृतेश्चानभिमते च जगत अनादित्वेऽकृताभ्युपगमकृतप्रणाशश्च स्यात्।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंचात्रोत्पत्तिरपि न सिध्यति तदुपादानस्यानिर्वचनीयत्वादधिष्ठानस्य चाप
रिछिन्नत्वात्तस्मात्सदेव सोम्येदमग्र आसीदिति श्रुतिर्व्यवहारमनुसृत्य जग
तो ऽधिष्ठानं चैतन्यं सोपाधिकं दर्शयति। ननु शुद्धं नापि शुद्धत्व सोपाधिकत्वविशेष
निरूपणे नो भययोः क्रममपि सोपाधिकत्वस्यानाद्यध्यस्तत्वात् शुद्धस्य चाप्र
च्युतस्वभावत्वात् उपाधेरनिर्वचनीयत्वाच्च नात्र परिछिन्नात्मस्फूर्त्तेरपरिछि
न्नात्मस्फूर्त्तेर परिछिन्नात्मस्फूर्त्तिपूर्वत्वमभ्युपगम्यते नापि शास्त्राचार्यप्रसा
दादपरिछिन्नात्मस्फूर्त्तेः परिछिन्नात्मस्फूर्त्तिपूर्वत्वं॥ पूर्वमहमुपाधिवान् संसा
र्यधुनाशुद्धो ऽसंसारीति परिछेदः कृतस्वरूपसाक्षात्कारस्य भगवदेकशर
णस्य जीवन्मुक्तस्य कस्यचिदपि परमार्थतो न स्फुरति तथैवाकृतसाक्षात्कारः
संसार्यपि पूर्वमहं ब्रह्मस्वरूपो ऽधुना संसारीति न स्मरति। अतो न चित्स्वरूपे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मणिसोपाधित्वनिरुपाधित्वविशेषःप्रतिपत्तव्यःकालत्रयेपिसत्तास्फूर्त्तिस्वरूपं
निर्विशिष्टंब्रह्मैवास्तिनचकिंचित्तदन्यत्सत्तास्फूर्त्योरविशेषात्नामरूपयोश्चानिरू
पितरूपत्वात्।तस्माद्ब्रह्मणोऽनुपहितोपहितत्वव्यवहारेपिनशुद्धत्वेव्यभिचरति
तथाचनहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतेविनाशित्वादितिश्रुतिरन्यत्रापितत्त्वमस्या
दिवाक्योत्थसम्यग्धीमात्रजन्ममात्रतःअविद्यासहकार्येणनासीदस्तिभविष्य
तीति।अत्रापरिछिन्नबोधैकरसेब्रह्मणिकालत्रयेप्यविद्यासत्त्वंदर्शितंभवति।
लोकसिद्धाभासग्रहणेप्यक्लृप्तगुरुशास्त्रजविद्यामात्रमज्ञानमितिच।एवंतादृ
शस्याज्ञानस्यानादित्वमपिसर्वैरनुभूयतइहखल्वमुकस्मिन्कालेमयानक्त
तंशास्त्राचार्यग्रहणमस्मात्कालादारभ्यमयाहंब्रह्मास्मीतिनज्ञातमितिकोपि
नस्मरतिस्मरणार्हमपिकालादिदोषान्नस्मरतीतिचेदज्ञानस्यज्ञानपूर्वत्वम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्ष्यते तस्य चाज्ञानपूर्वत्वमेवं चानवस्थास्यादतो मृगतृष्णिकातुल्यवर्त्तमानाभासएवै तस्यानादित्वं सूचयति गुरुशास्त्रजन्यत्तिश्चावस्तुत्वमपि। अन्यत्रापि व्यावहारिकमज्ञानं बाधते विद्ययैव तु अतो न प्रमितिवाक्यं कुरुते ऽज्ञानबोधकमिति॥ वस्तुतो नास्ति चाज्ञानं चित्प्रकाशविरोधतः अतो वाक्यं न चाज्ञानबोधकं च निरूपणइति च॥ तस्मादनिर्वचनीया वस्तुनोप्यज्ञानस्यानादित्वमभ्युपेयते यस्मादनादित्वं तस्मादनुत्पत्तिमत्वं चातश्चानिर्मोक्षानभ्युपगमश्चाभ्युपेयते। न चानिर्वचनीयत्वे नैव तथाभूतं वस्त्वस्तीति वाच्यं। तदधिष्ठानमर्यादया तस्यासिद्धत्वे नाधिष्ठानमात्रत्वात्तस्य। तथा च ब्रह्मगीतासु॥ अनिरूपितरूपेण सद्भाव इति चेन्मतं॥ अनिरूपितरूपस्य रूपं तु ब्रह्मकेवलमिति॥ अन्यत्रापि यदिदं साक्षिणो वेद्यं तत्सर्वं ब्रह्मकेवलमिति अप्रकाशो यथादित्ये नास्ति ज्योतिः स्वभावतः॥ नित्यबो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धस्वरूपत्वान्नाज्ञानं तद्वदात्मनीत्युपदेशसहस्र्यां । तस्मान्नकेनापि लक्षणेनाज्ञा
नपदार्थस्य वस्तुत्वं सिध्यति तन्निवृत्यनंतरमनिर्मोक्षोपीति सिद्धं । एवं साक्षित्वे च गु
रुशास्त्रजविद्यावृत्यभिव्यक्तपूर्णात्मेक्षणलक्षणसाक्षात्कारं विवृत्य तत्फलानुवा
दकं जगदिदं तद्बाधितं दृश्यतामित्यस्य विवरणं कृतमर्थात्तत्वज्ञानेन न सकार्यावि
द्यासत्वापादनेन परमानंदावाप्त्या कृतकृत्यः सन् तिष्ठेदिति दर्शितं भवति ॥ न च न
साक्षात्कारजन्यानंदस्य परमानंदत्वमभ्युपेयं जन्यत्वेन परिछिन्नत्वस्याभ्युप
गमात् इति वाच्यम् उभयपदयोरभिन्नार्थत्वात् । तत्र निदिध्यासनवृत्यापरोक्षाना
सापवादात्साक्षात्कारानुवादः ॥ कृतकृत्यत्वात्प्राप्ताशेषपुरुषार्थत्वान्निर्गलाशे
षानर्थत्वात्परमानंद इति च ॥ तस्मान्न साक्षात्कारपरमानंदयोर्जन्यजनकत्वं
यतः परिछिन्नानंदाभ्युपगमः स्यात् किंतु श्रवणमनननिदिध्यासनैः संपादित
वाक्यार्थविगतिसामर्थ्यस्याधिकृतस्य वाक्यार्थावगतिरेव परमानंदात्मसाक्षा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्कारः। ननु साक्षात्कारजन्य आत्मानंद इति विज्ञेयं साक्षात्कारलक्षणगुरुशास्त्र
जवृत्तेरपरिछिन्नात्मव्याप्यत्वात् किंचात्राखंडाद्वितीयवस्तुनियः परमानंदादिनि
र्देशः सोऽनानंदादिलोकं सिद्धाभासव्यावृत्त्यर्थो न तु तत्र विधिरूपेण वेदतात्पर्यं त
स्माद्गुरुशास्त्रप्रसादवृत्त्यभिव्यक्त एव परमानंदावाप्तिर्न तु तद्वृत्तिविषया न चै
तादृशसाक्षात्कारानंतरमपि ज्ञानिनो देहादिसत्त्वे विक्षेपपरिहारमपेक्ष्यात्म
चिंतनादिप्रसंख्यानं प्राप्तं तत्प्राप्तौ च न पुरुषार्थसिद्धिः स्यादुक्तलक्षणसाक्षा
त्कारमात्रेणेतिवाच्यं तत्के तत्कृत्यत्वात्। ज्ञानिनो विक्षेपाभावात् आत्मनश्चाचिंत्य
स्वरूपत्वात्सर्वाभिन्नापरोक्षस्वरूपत्वात् ननु चेत्सर्वाभिन्नात्मस्वरूपं सर्वत्रा
परोक्षत्वेन वर्त्तते तर्हि न कस्य चित्संसारप्राप्तिः स्यात् वेदांतानां चानर्थ्यं स्यादि
ति चेन्न। अनाद्यपरोक्षात्मसिद्धानिर्वचनीयात्माज्ञानद्वारात्मविलसितत्वात्सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सारस्यात्मापरोक्षतयैव हि तद्याथात्म्यापरिज्ञानेन प्राणिनः संसरंति यतोऽपरो
क्षात्मस्फूर्त्यैव परोक्षाणामपरोक्षाणां सर्वेषां ग्रहणं संगच्छते अनेन वेदानां च ना
नर्थ्यं स्यात् तत्र रागतः प्रवृत्तौ तु न वेदवचनं प्रयोजकं भवति तत्प्रवृत्तेः कस्यांचिच्चो
दनाऽनपेक्षत्वात् अपुरुषार्थसाधनत्वाच्च पुरुषार्थसिद्धिस्तु वेदाधीनैव। तथा च
यज्ञानां तपसां चैव शुभानां चैव कर्मणां॥ वेद एव द्विजातीनां निश्रेयसकरः परः इ
ति। तत्र ये केचित्त्वाधिकारतो विधितंत्रास्तेषां विधिवाक्यानि तत्तत्कर्मप्रेरणद्वा
रा पारंपर्येण निर्गुणात्मपराणि संति पुरुषार्थपर्यवस्यंतीयं च विधिसंस्कृता नीतराः
संतो निवृत्तिपरायणा भगवदेकशरणाः परपुरुषाधिकृता स्तान् प्रत्युपनिषद्वा
क्यानि साक्षात् परमपुरुषार्थपर्यवस्यंतीति चाकिंचित्कराः संतो सर्वस्माद्दुपर
म्यतिष्ठंति तस्मान्नतत्वमस्यादिवाक्यार्थवगमादूर्ध्वं ज्ञानिनां कृतकृत्यानां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चिंतनादिप्रसंख्यानाभ्युपगमःस्यात्कश्चिद्विक्षेपोवातथाचश्रुतिःतस्यकोमो
हःकःशोकएकत्वमनुपश्यतइति।तरतिशोकमात्मविदितिच।यत्सर्वमात्मैवाभू
त्तत्केनकिंपश्येदित्यादिच।भगवतापिनैवतस्यकृतेनार्थोनाकृतेनेहकश्चने
त्यादिनोक्तं।एवंपूर्णात्मासुसमीक्ष्यतामित्यारभ्यजगदिदंतद्बाधितंदृश्यतामि
त्यंतेनसाक्षात्कारस्यतस्यफलस्यचलक्षणंदर्शितमथश्लोकार्धेनविदेहकैव
ल्यंतज्जीवन्मुक्तिकथनेनप्रकरणंसमापयतितत्रयःकश्चिन्निःश्रेयसार्थीप्र
थमंकर्मकांडवेदपरिग्रहेणतदुक्तकाम्यनिषिद्धपरिवर्जनतयेश्वरार्थेननित्य
नैमित्तिकप्रायश्चित्ताद्यनुष्ठानेनसत्वशुद्धिप्रतिबंधकदुरितक्षयेनापगतरागा
दिमलःसन्संप्राप्तसत्वशुद्धिःसकलाश्रयश्रीमद्वासुदेवोपासनापरायणस्त
देकशरणःसंत्यक्तसर्वैषणःशमादिमानुत्पन्नबुभुत्सुःकृतसर्वसंन्यासःश्रुत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महावाक्यः कृतश्रवणमनननिदिध्यासोऽपगताऽशेषासंभावनादिदोषः परिल
ब्धवाक्यार्थग्रहणसामर्थ्यः कृतस्वरूपसाक्षात्कारो निरस्तसकार्याविद्यः पूर्णा
त्मतयावाप्तसकलकामो निरस्ताशेषानर्थः संप्राप्तनिरतिशयानंदः कृतकृत्य
स्तिष्ठतीति स सद्यः कैवल्यवान्न तस्य कालांतरविदेहकैवल्यं जीवन्मुक्त्यनुकल्प
नीयमनादितस्यात्मनोऽपरिछिन्नकैवल्यस्वरूपत्वेनाधिकृतस्यैव कैवल्यस्वरू
पत्वात्॥ तदन्यस्यनादितोऽसत्वापादनेन सकर्मस्य देहस्यासत्वान्न तद्दृष्ट्या
प्रारब्धक्षपणं तद्देहपतनं नावशेषमस्ति॥ नन्वधिकृतस्य कैवल्यस्वरूपत्वे
ब्रह्मैवाधिकारीति स्याद्ब्रह्मणोऽधिकारित्वे विषयस्यायोगः विषयायोगे चवि
द्यायावैयर्थ्यं स्यात्तदधिकारस्य चेति चेत्सत्यं॥ तथाप्यनादिसाभासाज्ञानोप
हितानुपहितत्वेनैकस्यैवाधिकारत्वविषयत्वसिद्ध्यनस्ततोपहितत्वेनाधिका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्यनुपहितत्वेन विषयः स्वप्नं करान्तः जाग्रद्ज्ञानविषयत्ववत् ॥ तथा च श्रुतिः ॥
ब्रह्मवा इदमग्र आसीत्तदात्मानमेवावेदित्यत्राग्रे जीवदशायां जीवरूपेण ब्रह्मैवास्ती
ति तत्तो महावाक्यादात्मानमेव पदार्थशोधनद्वारा वेदाहं ब्रह्मास्मि न देहाद्यनुबंधे
जीव इति। अत्रोपहितानुपहितत्वयोरेकनीडत्वविरोधो नाशंकनीय उपाधेः स्वचि
दाभासेन सह स्वसाक्षात्काराकारत्वेन स्वमर्यादयैव साक्षिवेद्यत्वेन सिद्धत्वात्
न तु साक्षिमर्यादया तस्य निर्विशेषचैतन्यस्वरूपत्वान्न तस्माद्व्यवहारतोपि चैत
न्यस्वरूपस्यात्मनोऽसंगोदासीनत्वाधिकारतयैवावस्कृत्वेनादितोऽज्ञानसिद्धे
तदनुग्राहकत्वेन तदुपहितत्वेनाधिकारित्वेऽसत्यसंगोदासीनत्वेनानुपहितत्वे
न विषयत्वे सति च न कोपि दोषः प्रसज्जते परमार्थतस्तु कालत्रयेपि नाज्ञानं ना
म किंचिद्वस्त्वस्ति तत्कार्यं च किंतु प्रमाणनिरपेक्षः स्वतःसिद्धश्चिदात्मैव सर्वं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-2700 ६

सएवगुरुशास्त्रजविद्याविषयोऽतस्तज्ज्ञानादूर्ध्वंज्ञानिनोदेहादिस्तत्स्वतनंचाल
दनुसृत्यप्रारब्धफलभोगक्षपणंविदेहकैवल्यंचप्रारब्धांतेतथाचशेषवाक्यं।ती
र्थेवाश्वपचगृहेनष्टस्मृतिरपित्यजन्देहंज्ञानसमकालमुक्तःसकैवल्यंयातिह
तशोकइतिवसिष्ठोपितत्तनुंत्यजतुवाकाश्यांचांडालस्यगृहेपिवा॥ज्ञानसंप्राप्तिस
मयेमुक्तोसौविगताशयःआचार्यैश्चापरोक्षानुभूतौउक्तंकर्मजन्मांतरीयंयत्प्रा
रब्धमितिकीर्त्तितं।तत्तुजन्मान्तराभावात्पुंसोनैवास्तिकर्हिचित्।स्वप्नदेहोयथा
ध्यस्तस्तथैवायंहिदेहकः।अध्यस्तस्यकुतोजन्मजन्माभावेहितत्कुतइति॥तस्मा
दुक्तसाधनचतुष्टयसंपन्नोऽधिकारीश्रवणादिनाकृतपदार्थविवेकोवाक्यार्थ
बोधादेवसद्यःसंसाराद्विमुच्यकैवल्यभाग्भवति।नतस्यकिंचिदपिकर्त्तव्यम
स्ति।तथापिलोकदृष्टिमनुसृत्यज्ञानिनोपिसतारतम्यस्याचारस्यप्रतीयमानत्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=05.08.20 14:36
,TRANSFERRED=2020/08/05 at 14:47:22
,PAGES=91
,TYPE=STD
,NAME=S0003423
,Book Name=M-2700-ANUBHAVAKRIT PARIBHASHA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection